उर्व. । सह सख्या विषण्णा ।

विदू. । [3]अविहा अविहा उवट्ठिदा देवी । ता वाचंजमो होहि ।

राजा । भवानपि संवृताकारमास्ताम् ।

उर्व. । हला[4] किं एत्थ करणिज्जम् ।

चित्र. । [5]अलं आवेगेण । अन्तरिदा वयं । उववासणिअमवेसा राएसीमहिसी दीसदि । ता ण एसा इह चिरं चिट्ठिस्सदि ।

---

१ अतित्वरिते अनुत्क्षिप्ततिरस्करिणीकासि ।—२ इत इतो भर्त्री ।—३ अपिहा अपिहा उपस्थिता देवी । तद्वाचंयमो भव ।—४ हला किमत्र करणीयम् ।—५ अलमावेगेन । अन्तर्हिते आवाम् ।

---

1. B.हला before अदि° which it reads अदितुवारिए. G.अतितुवरिदे. A.°तुवरदे.—U. ins. अयि before आदि°.—U.°तुरिदे असंखित्ततिरक्करिणी आसि.—A.°तिरक्खरिणीआसि. N.N2.अणुखि[N2.निख]त्ततिरक्क[N2.क्ख]रिणीआसी. B. has अणिक्खित्ततिरक्खरिणी होसि. P.अणिक्खित्ततिरक्खरिणीआसि. G.K संठिद[G.संहिद]तिरक्करणीका-[K.आ]सि. Kâṭavema अणक्खित्त°(=“अनाक्षिप्त°”).
2. P.भट्टिणि.
3. For कर्णं ददति P.G.K. have आकर्णयन्ति.
4. P.सख्या सह.
5. For अविहा अविहा. G.K. have अइ भो. P.अविह अविह भो वअस्स उव°.&c. N.N2.अविहा उव°.U. अविद २(*i. e.* अविद अविद) भो उवट्ठिदा देवी ता मुद्दिअतमुहो होहि.—For ता &c. A.भो तुवं वाअंअमो होहि. N.N2. om. ता and read भो वाअंअतो[मो?] होई. G.K.दाव for ता. B.ता तुमं वाअंअमो होहि. P. ditto, except that it omits ता.
6. A.B.P.°कार आस्ताम्.
7. P.कहं करणिज्जं for हला &c. A.N.N2.हला कहं करणीअं. So also U., only having कधं and करणीयं. B.हला एत्थ किं कर°.
8–9. N.N2.आवेसेण for आवेगेण. B.आवेएण. U.दाणिंसि तुमं for वयं.—U. विहिदणिअमवेसा राअमहिसी दीसइ । ता एसा चिरं ण चिट्ठदित्ति. A.अन्तरिहिदा होम । एसा खु विणीदवेसा राजाणं सेवन्ती ण एत्थ चिरं चिट्ठिस्सदि । तथा स्थिते. N.N2.अन्तहिदा होम्ह । एसा क्खु विणीदवेसा

। ततः प्रविशत्यौपहारिकहस्तपरिजना देवी ।

देवी । परिक्रम्यावलोक्य च । हञ्जे णिउणिए एसो रोहिणीसंजोएण अधिअं सोहदि भअवं मिअलञ्छणो ।

चेटी । णं देवीसहिदो भट्टा विसेसरमणिज्जो । परिक्रामति ।

विदू. । दृष्ट्वा । भो ण जाणामि सोत्थिवाअणं देइत्ति आदु भवदो वदव्व-

---

उपवासनियमवेषा राजर्षिमहिषी दृश्यते । तन्नैषेह चिरं स्थास्यति ।

१ हञ्जे निपुणिके एष रोहिणीसंयोगेनाधिकं शोभते भगवान्मृगलाञ्छनः । — २ ननु देवीसहितो भर्ता विशेषरमणीयः । — ३ भो न जानामि स्वस्तिवाचनं ददातीति अथवा भवतो व्रतव्यपदेशेन मुक्तरोषा प्रणिपातलङ्घनं प्रमार्ष्टुकामेति । अद्य ममाक्ष्णोः शुभदर्शना देवी ।

राआणं सेवन्ती ण एत्थ चिरं चिट्ठदि । उभे तथा स्थिते.—B.अलं आवेएण । अन्तहिदा दाव होहि । इअं विणिअमट्ठिअवेसा राआणं सेवन्ती ण इह चिरं चिट्ठिस्सदि. P.अलं आवेएण अन्तरिदा होम्ह इअं सणिअमवेसा विअ राआणं सेवन्ती दिस्सइ एसा ण चिरं चिट्ठिस्सदि. We with G.K. and Kâṭavema.

1. G. प्रविष्टा औपहारिकहस्ता सपरिवारा देवी. U.त° प्र° भृतोपहारपरिजना दे°. B.ततः प्रविशत्युपहारहस्तपरिजना देवी चेटी च. K.प्रविश्योपहारहस्तपरिवारा देवी चेटी च.

2–3. Before this speech, P. G.B.A. give चेटी । इदो इदो भट्टिणी[G.देवी].—A.N.N2.U.चन्द्रमसम[U.चन्द्रम]वलोक्य for the stage-direction परि° &c. B. P.चन्द्रमसं विलोक्य.—G.K.om. णिउणिए.—P. A. B. अज्ज, and N.N2.अअं, for एसो. P.A.N.N2. U.B.अहिअं. G.K.अधिअं.—U. रोहिणीजोएण. P.रोहिणीसहाओ. B. सोभइ. P.सोहइ.— N.मिग्गलञ्छो. N2. मअलञ्छणो.

4. G.K.णं देवीसहिदस्स भट्टिणो विसेसरमणीअदा भोदि[K.होदि]. B. णं देवीसहितस्स भट्टिणो विअ विसेसरमणिज्जदा होदि. U.णं स(?सं?)णज्जिस्सदि भट्टिणी सहिदस्स भत्तुणो विसेसरमणीअदा. U.इति परिक्रामतः. —A.N.N2.णं भट्टिणीसहिदो भट्टा विसेसदंसणीओ होदि. We with P. and Kâṭavema. P.B.सर्वे परिक्रामन्ति.

5. A.दृष्ट्वा । भो जाणामि सोत्थिवाअणअं किंपि देइत्ति भवन्तमन्तरेण अ वदावदेसेण मुक्करोसेत्ति तक्केमि अज्ज मे अच्छीणं सुहदंसणा देवी. N. N2.दृष्ट्वा । भो जाणामि सोत्थिवाअणकंपि देइत्ति भवन्तमन्तरेण अ वदावदेसेण मुक्कदो[sic]सेत्ति तक्केमि । अज्ज मे अच्छिणं सुहदंसणा देवी. B.वि०। भो

वदेसेण मुक्करोसा पणिपादलङ्घणं पमज्जिदुकामेत्ति। अज्ज मे अक्खीणं सुहदंसणा देवी।

राजा। सस्मितम्। उभयमपि घटते। तथापि भवता यत्पश्चादभिहितं तन्मां प्रति भाति। यदत्रभवती

सितांशुका मङ्गलमात्रभूषणा
पवित्रदूर्वाङ्कुरलाञ्छितालका।
व्रतापदेशोज्झितगर्ववृत्तिना
मयि प्रसन्ना वपुषैव लक्ष्यते ॥ १२ ॥

देवी। उपगम्य। [1]जेदु जेदु अज्जउत्तो।

---

१ जयतु जयतु आर्यपुत्रः।

जाणामि सोत्थिवाअणं कत्तिदं ण वेत्ति। भवन्तं अन्तरेण वदावदेसेण मुत्तरोसेत्ति तक्केमि। अज्ज मे अक्खिणं सुहदंसणा देवी. K.वि०। भो णं जाणासि सोत्थिवायणकं देइत्ति आदु भवदो वदव्ववदेसेण मुक्करोसा पणिपादलङ्घणं संमज्जिदुकामेत्ति अज्ज मे अक्खीणं सुहदंसणा देवी. G दृष्ट्वा। भो णं जाणामि सोत्थिवाअणं देइत्ति आदु भवदो वदवकम्ववदेसेण मुक्करोसा पणिपादलङ्घणं पमज्जिदुकामेत्ति। अज्ज मे अक्खिणं सुहदंसणा देवी. P. भो जणामि सोत्थिवाअणं वट्टदि भव्वदं अन्तरेण वदावदेसेण मुत्तकोवा अज्ज मे अच्छिणं सुहदंसणा देविन्ति. U.दृष्ट्वा। भो णं जाणामि सोत्थिवअणं देदित्ति॥ आदुं भवदो व्वदव्वदेसेण मुक्करोसा पणिपादलङ्घणं पमज्जिदुकामेत्ति अज्ज मे अक्खीणं सुहदंसणा देवी. We generally with G. K.U. and Kâṭavema, the latter, however, omitting त्ति after and inserting मे before देइ, and having वदकम्मव्ववदेसेण, and reading the भवदो before पणिपाद° instead of before वद°.

3–4. A. has उभयथा भवता यत्तु पश्चादभिहितं &c. $N.N_2$.उभयथा भवते। यत्तु पश्चादभिहितं &c. U. has यत्तु पश्चादभिहितं for तथापि भवता यत्पश्चादभिहितं. B.उभयमपि भवति यत्तु पश्चादभिहितं तन्मां प्रति. K.उभयमपि घटते तथा भवता यत्पश्चादभिहितं तन्मां प्रतिभाति. P.उभयथापि भवतः। यत्तु पश्चादभिहितं तन्मे प्रतिभाति. $A.N.N_2$.तथा हि for यत्. P.विचित्र° for पवित्र°.

7. B.P.°वृत्तिका.

8. G.K.U.मम for मयि. We with $A.N.N_2.B.P.$—K.A.B.वपुषेव.

9. B.उपसृत्य. G.जभदु जभदु. B.

परिजनः । जेदु जेदु भट्टा ।

विदू. । सोत्थि भोदीए ।

राजा । स्वागतं देव्यै । तां हस्तेन गृहीत्वोपवेशयति ।

उर्व. । हला इअं ठाणे देवीसद्देण उवआरीअदि । ण किंपि परिहीअदि सचीए ओजस्सिदाए ।

चित्र. । साहु असूआपरम्मुहं मन्तिदं ।

---

१ जयतु जयतु भर्ता ।—२ स्वस्ति भवत्यै ।—३ हला इयं स्थाने देवीशब्देनोपचर्यते । न किमपि परिहीयते शच्या ओजस्वितया ।—४ साधु असूयापराङ्मुखं मन्त्रितम् ।

K. do not repeat जेदु. U. महाराओ for भट्टा. B.P. भ॰-भट्टा.

1. G. जयदु जयदु भट्टारके:. U. जयति देवी. B. om. this speech. P. does not repeat जेदु.

2. A. वड्ढदु भोदी. N.N₂. वड्ढदु भोदी. P. वड्ढदु देवी. K.U.B. सोत्थि for सत्थि. B. होदीए.

3. K.G.U. देवि स्वागतम्.—G. om. ताम् and A.N.N₂. read हस्ते गृहीत्वोपनिवेशयति. U. हस्ते गृहीत्वोपवेशयति. B. हस्तेन गृहीत्वोपनिवेशयति. K. हस्तेन परिगृह्योपनिवेशयति. P. हस्तेन गृहीत्वोपवेशयति.

4–5. A. हला ठाणे इअं देवीसद्देण उवआरिअदि. So N.N₂., only inserting क्खु after ठाणे. U. reads ठाणे इअं ति देवीसद्देण उवआरीयदि । ण हि किंपि परिहीअदि सचीए ओजस्सिदाए. G.K. om. हला and G. wrongly reads देवी भद्देण for देवीसद्देण. G. इयं for इअं. K. इअंपि. B. हला ठाणे इअं. B. उवआरीअदि । ण परिहीणा देवीसद्दस्स, omitting the comparison about S'achî. K. उ॰ । इअं ति ठाणे देवीसद्देण उवआरीअदि ण किंपि परिहीअदि सचीदो ओजस्सिदाए. P. हला इअं ठाणे देवीसद्देण उवआरिअदि ण परिहि॰अदि अस्स सद्दस्स. A. N.N₂. सिरीए for सचीए.—N.N₂. ण हि for ण किंपि.

6. B. om. साहु and adds तुए after मन्तिदं. N.N₂. साहु असूअं परिहरिअ मन्तिदं. G.K.U. सहि असूआपरंमुहं मन्तिदं तुए.

देवी । अज्जउत्तं पुरोकारिअ कोवि वदविसेसो मए संपादणीओ । ता मुहूत्तं उवरोधो सहीअदु ।

राजा । मा मैवम् । अनुग्रहः खलु नोपरोधः ।

विदू. । ईरिसो सोत्थिवाअणवन्तो उवरोहो बहुसो होदु ।

राजा । किंनामधेयमेतद्देव्या व्रतम् ।

देवी । निउणिकामवेक्षते ।

निउ. । भट्टा पिआणुप्पसादणं णाम ।

राजा । देवीं विलोक्य । यद्येवम्

अनेन कल्याणि मृणालकोमलं
व्रतेन गात्रं ग्लपयस्यकारणम् ।

---

१ आर्यपुत्रं पुरस्कृत्य कोपि व्रतविशेषो मया संपादनीयः । तन्मुहूर्तमुपरोधः सह्यताम् ।—२ ईदृशः स्वस्तिवाचनवानुपरोधो बहुशो भवतु ।—३ भर्तः प्रियानुप्रसादनं नाम ।

---

1. B.P.अ०अउत्तं. U.पुरोकदुअ. B. पुरदोकारिअ. A.मे for मए, which N.N2. altogether omit. B.P. read the मए after कोवि.—P. संपादणिज्जो.

2. A.K.मुहूत्तअं. N.N2.U.मुहुत्तअं.—A.B. °रोहो सहिअदु. N.N2.K. °रोहो सहीअदु. P.सहि०अदु. U.सहिअदु.

3. B.P.माणवक अनुग्रहः खल्वयमुपरोधः.—A.अयं for न. N.N2.om. न.

4. A.एरिसो भोज्जसोत्थि°. U.ईदिसेहिं सोत्थिवाअणेहिं दे बहुसो उवरोधो होदु. N.N2.इरिसो भोअणसोत्थि°. B.ईरिसो एव्व सोत्थिवाअणणिमित्तो उवरोहो बहुसो होदु. G.जारिसो सोत्थिवाअणकवन्तो तारिसो अवरोहो होदु. K.ईरिसाणं सत्थिवाअणकारणं [corrected from काणं] बहुसो उवरोहो होदु.

5. G.K.om.एतत्. U. inserts निपुणाम[*sic*]वलोक्य before किंनाम° and omits the following line, देवी निपुणिकामवेक्षते, which however all other Mss. agree in giving.

6. B.निपुणिकामुखम्.

7. G.om.भट्टा पि°.K.om. भट्टा. A. भट्टापिया°[="भर्तृप्रिया°"].N.N2. °पसाअणं.U.भट्टा पिअप्पसाअणं णाम. B.P.भट्ट. Kâṭavema reads with us, and translates भर्तः प्रिया°. Ranganâtha's chhâyâ, भर्तः प्रियप्रसादनं नाम.G. °पसादणं.

8. G.K. अवलोक्य.

10. B.ग्लपयति.

प्रसादमाकाङ्क्षति यस्तवोत्सुकः
स किं त्वया दासजनः प्रसाद्यते ॥ १२ ॥

उर्व. । [1]महन्तो खु से इमस्सिं बहुमाणो ।

चित्र. । [2]अइ मुद्धे अण्णसंकन्तप्पेम्माणो णाअरिआ अहिअं दक्खिणा होन्ति ।

देवी । सस्मितम् । [3]णं इमस्स वदपरिग्गहस्स अअं पहावो जं एत्तिअं मन्ताविदो अज्जउत्तो ।

विदू. । [4]विरमदु भवं । ण जुत्तं सुहासिदं पच्चाचरिदुं ।

---

१ महान्खल्वस्यैतस्यां बहुमानः ।—२ अयि मुग्धे अन्यसंक्रान्तप्रेमाणो नागरिका अधिकं दक्षिणा भवन्ति ।—३ नन्वेतस्य व्रतपरिग्रहस्यायं प्रभावो यदेतावन्मन्त्रयित आर्यपुत्रः ।—४ विरमतु भवान् । न युक्तं सुभाषितं प्रत्याचरितुम् ।

---

1. G.N.काङ्क्षति.
2. P.प्रसाध्यते.
3. U. ins. सवैलक्ष्यास्मितं at the beginning of the speech.—U. क्खु एदस्स for खु से. P.om.से.—A.N.N_2.इमाए for इमस्सिं. G.K. सहि सरिसं एव्व[K.जेव्व] जं [G. om.] एसा आकिदी बहुमाणस्स[K. °माण] अइ &c. U.सहि सरिसं जेव्व जं एसा आकिदी बहुमाणा अइ &c.
4. A.P.N.N_2.om. अइ.—N.N_2. have मुद्धे, repeated.—P. °संकन्तहिअआ. U.om. °संकन्त°.—N.N_2.अण्णसंकेतप्पेमाणाअरिआ.—B. K. °पेमाणा. G.अहिअणं for अहिअं. U.has °भारिआए पिअवअणा for दक्खिणा.

6–7. G.B.K.om.णं.—U.om.सस्मितम् । णं, and has इमस्स व्वदस्स अअं प्पहावो जं एत्तिअं मन्ताविदो अज्जउत्तो for the whole speech. K.वदप्परि°.K.प्पहावो.—For मन्ताविदो. G.K. have गददि.—A.अय्य°. B.P.अ०अ°.

8. P.ण जुत्तं सुभरिदपच्चूहं आभरिदुं. G. ins. तुए, and K.ताए before सुहासिदं. B.सुभासिदं पच्चसरिदुं. A. पच्चसारिदं. N.N_2.पच्छुस्सारिदुं. U.पच्चक्खिदुं. सुहासिदं is the reading of seven of our Mss. and of the two commentators.

देवी । [1]दारिआओ उवणेध ओवहारिअं जाव मणिहम्मिअगदे चन्दपादे अच्चेमि ।

परिजनः । [2]एसो गन्धकुसुमादिउवहारो ।

देवी । नाट्येन गन्धपुष्पादिभिश्चन्द्रपादानभ्यर्च्य । [3]हञ्जे इमे ओवहारिअमोदए अज्जमाणवअं लम्भावेहि ।

परिजनः । [4]जं देवी आणवेदि । अज्जमाणवअ एदं दाव दे ।

विदू. । मोदकसरावं गृहीत्वा । [5]सोत्थि भोदीए । बहुफलो दे उववासो होदु ।

---

१ दारिका उपनयतौपहारिकं यावन्मणिहर्म्यगतांश्चन्द्रपादानर्चामि ।—२ एष गन्धकुसुमादिरुपहारः ।—३ हञ्जे एतानौपहारिकमोदकानार्यमाणवकं लम्भय ।—४ यद्देव्याज्ञापयति । आर्यमाणवक एतत्तावत्ते ।—५ स्वस्ति भवत्यै । बहुफलस्तवोपवासो भवतु ।

1–2. A.N.N_2.दारिआ उवणेह. G. उवहारिअं. U.दारिओ आणेध उवहारिअं जाव हम्मगदे चन्दवादे अच्चेमि. G.दारिओ उवणध. B.दारिए उवणेहि ओवहरिअं. P.उवणेह. G.जधा for जाव. N.N_2. °गदं चन्दवादं.

3. A.N.N_2.जं भट्टिणी आणवेदि एदं गन्धसुमणादि ओवहारिअं. U.जं देवी आणवेदि । एसो उवहारो. B.दारिकाः । अअं गन्धसुमणादिओ ओवहारिओ. P.परिचारिकाः । अअं गन्धमालिआदिओ उपहारो. N.N_2.इत्यौपहारिकं देव्या हस्तेर्पयति at the end of the speech.

4–5. U.उवणेह, and G.उवणेध bef. नाट्येन &c. A.N. ins. गृहीत्वा before नाट्येन.—A.B.P.सुमनसोभिः for गन्धपुष्पादिभिः. K. गन्धकुसुमादिभिः. N.N_2. om. गन्धपुष्पादिभिः. B.P.हञ्जे णिउणिए. U. इमेहिं उवहारेहिं मोदएहिं अज्जमाणवअं कञ्चुइं च अच्चेध for इमे &c. G.अवहारिअ°. N.N_2.ओपहारिआ मोदआ. A.अय्यमाणवअं. G. has अज्जमाणवअं कञ्चुइअं लम्भेमि. N.N_2.आणवेहि. A.लावेहि. B.इमे हुवे ओवहारिअमोदए अ॰अमाणवअं कञ्चुइं अ लम्भावेहि. K.उवहारमोदए अज्जमाणवअं कञ्चुइअं लम्भेह.

6. B.P.A.N.N_2.भट्टिणी for देवी.—G.°माणव. B.अ॰अ°. B om. दाव. B.तुह for दे. P.यथोक्तं करोति for अज्ज &c. up to दे. A.N.N_2. om. दे.

7. B. मोदकं. K.P.U. °शरावं. K. तवकं गृहीत्वा. A.B.P.होदीए. N.N_2.भवदीए. N.N_2.उवणसो (*sic.*) U.बहुफलो एस व्वदो होदु. P.°फलो होदु तुह उववासो. B.देवीए for दे. N.N_2.से for दे. A.उववासो. N.

देवी । [1]अज्जउत्त इदो दाव ।

राजा । अयमस्मि ।

देवी । राज्ञः पूजामभिनीय प्राञ्जलिः प्रणिपत्य । [2]एसा अहं देवदामिहुणं रोहिणीमिअलञ्छणं सक्खीकरिअ अज्जउत्तं अणुप्पसादेमि । अज्जप्पहुदि जं इत्थिअं अज्जउत्तो पत्थेदि जा अज्जउत्तस्स समागमप्पणइणी ताए मए पीदिबन्धेण वत्तिदव्वंति ।

उर्व. । [3]अम्हहे ण आणे किंपरं से वअणंति । मम उण विस्सासविसदं हिअअं संवुत्तं ।

---

१ आर्यपुत्र इतस्तावत् ।— २ एषाहं देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्यार्यपुत्रमनुप्रसादयामि । अद्यप्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते यार्यपुत्रस्य समागमप्रणयिनी तया मया प्रीतिबन्धेन वर्तितव्यमिति ।— ३ अहो न जाने किंपरमस्या वचनमिति । मम पुनर्विश्वासविशदं हृदयं संवृत्तम् ।

N₂.भोदु. After this speech K.U. have चेटी । अज्ज कञ्चुअ-[U.इ] एदं तव[U.दे] । कं । गृहीत्वा स्वस्ति भवत्यै[U.देव्यै].

1. A.अय्य°. B.P.अ०अ०.
2. B. wrongly अहम् for अयम्.
3. A.राजपूजाम्. P. om. राज्ञः पूजामभिनीय. P. om. एसा. U. om. अहं.

4–5. A. °मअलञ्छणं. N.N₂. °लाञ्छणं. U. °मिहलञ्छणं. A. N.N₂.पच्चक्खीकरिअ. B.°कदुअ. U.सक्खीकदुय अज्जउत्तमणुप्पसादेमि. G. om. अज्जउत्तं. B.P.अ०-अ°. K.A.N.N₂. read पसादेमि. A.N.N₂.अज्जप्पहुदि. A.अय्य°.B. P.अ०अ°. G.K. have जं अज्जउत्तो इत्थिअं. U.अज्जउत्तो जं इत्थिअं कामेदि जा अज्जउत्तस्स समागमप्पणइणी ताए सह अप्पाडिबन्धेण वत्तिदव्वं. A.इच्छदि for पत्थेदि. A.N. N₂.B. ins. इत्थिआ after जा. A. अय्यउत्तेण and N.N₂.अज्जउत्तेण for अज्जउत्तस्स. A.समाअम°.

6. A.पीदिबन्धणा[°बन्धेण ?] एव्व वत्ति°. N.N₂.ताए वट्टिदव्वंति. B. ताए मए पीतिबन्धेण वत्तिदव्वं. K. ताए समं पीदिबअणेण वत्तिदव्वंति. P.ताए मयि समपीदिबन्धेण वट्टिदव्वं. G.ताए समं पीतिबन्धेणेव्व वत्तिदव्वंति.

7–8. N.N₂. om. अम्महे. U.अम्महे. B.अंहहे. For किंपरं G. कीरिसं and K. केरिसं. U. om. ति after वअणं. A.N.N₂.विस्ससविसण्णं. B.

चित्र. । [1]सहि महाणुहावाए पदिव्वदाए अब्भणुण्णादो अणन्तराओ दे पिअसमागमो हविस्सदि ।

विदू. । अपवार्य । [2]छिन्नहत्थो मच्छे पलाइदे णिव्विण्णो धीवरो भणादि धम्मो मे हविस्सादित्ति । प्रकाशम् । भोदि किं तारिसो पिओ तत्तभवं ।

देवी । [3]मूढ अहं खु अत्तणो सुहावसाणेण अज्जउत्तं णिव्वुदसरीरं कादुमिच्छामि । एत्तिएण चिन्तेहि दाव पिओ ण वेत्ति ।

---

१ सखि महानुभावया पतिव्रतयाभ्यनुज्ञातोनन्तरायस्ते प्रियसमागमो भविष्यति ।— २ छिन्नहस्तो मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यतीति । भवति किं तादृशः प्रियस्तत्रभवान् ।— ३ मूढ अहं खल्वात्मनः सुखावसानेनार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि । एतावता चिन्तय तावत्प्रियो न वेति ।

P.अविस्सासविसअं हिअअं विसण्णं संवुत्तं. P.om. संवुत्तं. We with G.K.

1. A.महाण्हावाए. N.N2.B.P.महण्हावाए. N.N2.om. दे. B.अब्भणुण्णादासि ता अण°. P.अणुगादो [अणुण्णादो]. U.अणुण्णादो.

2. K.P.A.U. °समाअमो. U.पिअ°. P.B.K.भविस्सदि.

3–5. U. after अप°:—छिण्णहत्थस्स पुरदो मछे पलाइदे णिव्विण्णो भणादि धम्मो मे हुविस्सदित्ति । प्र० । भोदि किं तारिसो तत्तभवं. A.N.N2.भिण्णहत्थो. B.णिब्भिण्णबन्धे मज्झे. P.भिण्णहत्थे मच्छे. K.छिण्णहत्थे भज्जे. N.N2.om. णिविण्णो. B.P.णिव्विण्णो. B.धीवलो. G.om. धीवरो. And G.K. read भणादि मे धम्मो हविस्सदि. K.N.N2.P. भणादि. P.N.N2.B. भविस्सदित्ति. K.हुविस्सदित्ति.—A. किं ते दासो तत्तभवं. N.N2.भोदि किं दे[N2. ते] उदासीणो तत्तभवं. B.किं तुए दत्तो तत्तभवं अण्णाए किं तुह दासो तत्तभवं. G.भो for भोदि. K.भोदि किं तारिसो तत्तभवं. P.होदि किं दिण्णो तुए तत्तभवं.

6–7. P.मूढहिअअ.—P.N.N2.om. अहं. U.K.खु.—A.N.N2.सुहोवरोहेण for सुहावसाणेण. B.P.वदावदेसेण. B.P.अ०अ°. B. कादुं इच्छामि. P.करिअदुं इच्छामि.—U. अज्जउत्तस्स सुहं इच्छामि for "अज्जउत्तं....इच्छामि" A.अय्य°. K.U.एत्तिकेण. K.पिओ.

राजा ।

दातुं वा प्रभवसि मा-
मन्यस्यै हर्तुमेव वा दासम् ।
नाहं पुनस्तथा त्वं
यथा हि मां शङ्कसे भीरु ॥ १४ ॥

देवी । होहि वा मा वा । जधाणिद्दिठ्ठं संपादिदं पिआणुप्पसादणं वदं । दारिआओ एध गच्छम्ह । प्रस्थिता देवी ।

राजा । प्रिये न खलु प्रसादितोस्मि यदि संप्रति विहाय गम्यते ।

देवी । अज्जउत्त अलङ्घिदपुव्वो मए णिअमो ।

---

१ भव वा मा वा । यथानिर्दिष्टं संपादितं प्रियानुप्रसादनं व्रतम् । दारिका एत गच्छामः । — २ आर्यपुत्र अलङ्घितपूर्वो मया नियमः ।

2–5. A.B.P. make an anushṭubh of the stanza, thus: दातुं वा प्रभवसि मामन्यस्मै [B.P. अन्यस्यै] हर्तुमेव वा । नाहं पुनस्तथा भीरु यथा मयि विशङ्कसे. So N. N2., but have हन्तुम् for हर्तुम्. U.दातुमसहने प्रभवस्यन्यस्मै कर्तुमेव वा दासम्, and then has त्वयि for त्वं. G.प्रभवति. K.अन्यस्मै कर्तुमेव वा दासम्.

6. For होहि, U. भोदु, and B.P.G. होदु. U.K. omit वा before मा. —G.जणणिद्दिठ्ठं for जधाणिद्दिठ्ठं. N. U.जहाणिद्दिट्ठं. B.P.जहणिद्दिठ्ठं. P. संपादिअं. G.K. ins. मए after संपादिदं. N.N2.पिअप्पसादणं. U. पिअप्पसाहणं. K. °प्पसादणवदं. P. B.A.N.N2. ins. णाम after °प्पसादणं. U.N.व्वदं.

7. A.एह दारिआ गच्छ[म्ह]. N.N2. एहि दारिआ गच्छम्ह. U.एअ परिजणा गच्छम्ह for दारिआओ &c. and om. the stage-direction. B. एहि दारिएआ गच्छम्ह. P.अयि दारिआओ गच्छम्ह. G.K.इदो for एध. N.N2. om. प्रस्थिता देवी. B. om. देवी.

8. B.पटान्ते गृह्णन् at the beginning. U. om. प्रिये. N.N2.यद् for यदि. G.यदिदं. A.यदि [corrected from यदिदं]. U. wrongly om. यदि. N.N2.उत्थाय for विहाय.

9. B.P.अ०अ°. U.ण लङ्घिदव्वो संपदं णिअमो for अलङ्घि° &c. B. अणुल्लङ्घिदपुव्वो मे णिअमो. A. णिआमो. P. मे for मए.

[निष्क्रान्ता सपरिवारा देवी ।

उर्व. । [1]हला पिअकलत्तो राएसी । ण उण हिअअं णिवत्तेदुं सक्कुणोमि ।

चित्र. । [2]किं उण तुए णिरासाए णिवत्तीअदि ।

राजा । आसनमुपेत्य । वयस्य न खलु दूरं गता देवी ।

विदू. । [3]भण विस्सध्धं जं असि वत्तुकामो । असज्झोत्ति वेज्जेण आदुरो विअ सेरं मुत्तो भवं तत्तहोदीए ।

राजा । अपि नामोर्वशी–

---

१ हला प्रियकलत्रो राजर्षिः । न पुनर्हृदयं निवर्तयितुं शक्नोमि । —२ किं पुनस्त्वया निराशया निवर्त्यते । —३ भण विश्रब्धं यदसि वक्तुकामः । असाध्य इति वैद्येनातुर इव स्वैरं मुक्तो भवांस्तत्रभवत्या ।

---

1. G.निःक्रान्ता. U.इति सपरिजना निःक्रान्ता. K.सपरिवारा.

2. B.P. om. हला. K.पिअ°. N. N₂.राअसी. B. ins. से after ण. G.K.तहवि मम हिअअं णिवत्तेदुं ण सक्कणोमि[K. सक्कुणोदि] for ण उण &c. A.णिअत्तेदुं. P.तहवि ण उण हिअअं तदो णिव्वुत्तेदुं &c. A. N.N₂.सक्कोमि. U.ण उण हिअअं णिअत्ताइदुं सक्कुणोमि.

3. A.N.N₂.हला किं तुए णिरासाए णिउत्तीअदि[A. णिअव्वित्तीअदि.=A. "निर्विद्यते"].U.कध थिरसोहिदो णिअत्तीअदि. B.किं उण तुए णिरासाए णिवत्तीअदि. P.किं तुए एदं णिरासाव[ए?] णिव्वत्तिअदि. G.K.किं मुधा-[K.मुध्धे] थिरसोहिदो अप्पा णिन्दीअदि. So also Kâṭavema. We with B.

4. U.उपसृत्य, and om. न खलु. B.वयस्य दूरं गता देवी. A. om. न.

5–6. A.N.N₂.वीसध्धो and put असि after वत्तुकामो, "वत्तुकामोसि." U.विसत्थो and reads जंसि वत्तुकामो. B.जं वत्तुकामोसि. P. has no सि or असि. G.K.A.N.N₂. असक्कोत्ति[N.N₂. om. त्ति] परिच्छिदिअ[K.N.N₂.पडिच्छन्दिअ] आदुरो विअ वेज्जेण[A.N.N₂.वेज्जेण आदुरो विअ] सेरं[G.सैरं][K. ins. तुमं] मुक्को तत्तभोदीए[A.N.N₂.°हो-दीए]. B.सअं उत्तो for सेरं मुत्तो. U.असक्कोत्ति परिच्छन्दिअ आदुरो विअ वेज्जेण अइरेण मुक्को तत्थभवं भोदीए. We with B. P. and Kâṭavema.

7. P.G.K. उर्वश्या.

उर्व. । अज्ज किद्त्था भवे[1] ।

राजा ।

गूढा नूपुरशब्दमात्रमपि मे कान्ता श्रुतौ पातयेत्
पश्चादेत्य शनैः कराम्बुजवृते कुर्वीत वा लोचने ।
हर्म्येस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना बला-
दानीयेत पदात्पदं चतुरया सख्या ममोपान्तिकम् ॥ १५ ॥

उर्व. । हला इमं दाव से मणोरहं[2] संपादइस्सं । पृष्ठतो गत्वा राज्ञो नयने संवृणोति ।

चित्र. । विदूषकं संज्ञापयति ।

राजा । स्पर्शं रूपयित्वा । सखे नारायणोरुसंभवा सेयं वरोरूः ।

१ अद्य कृतार्था भवेत् ।—२ हला एतं तावदस्य मनोरथं संपादयिष्यामि ।

1. G.भवेअं. P.U.भवेयं both reading उर्वश्या in the previous speech. N.N2. wrongly assign this speech to Chitralekhâ. N.N2.कदत्था हवे. B.होमि.

3. U.गूढं.

4. N.N2.पश्चादेत्य कराम्बुजेन निभृते कुर्वीत वा लोचने. U.करोत्पल°. K.°भृते for °वृते.

5. G.हर्मे.

7–8. N.N2.दाव इमं. U. gives the speech to Chitralekhâ and reads thus: चि० । हला उव्वसि इमं दाव दे मणोरहं संपादेहि after which follows: उर्वशी । ससाध्वसा । कीळिस्सं दाव । इति पृष्ठेनागत्य राज्ञो लोचने संवृणोति. K. reads thus. हला इमं दाव से मणोरहं संपादेम्ह. A.N.N2.पूरइस्सं for संपादइस्सं.—B. inserts अदृष्टरूपा before संवृणोति. P.अदृश्यरूपा after गत्वा.

9. G.K.विदूषकं संज्ञां लम्भयति. U. विदूषकं संज्ञया लम्भयति.

10. A.N.N2.P. ins. as follows before the King's speech: "विदू. । भो वअस्स[N.N2.P. om. both words]का उण एसा". Our authority for omitting this speech of Vidûshaka is B. G.K.U. and Kâṭavema. We do not, besides, quite expect Vidûshaka to ask the question, after the sign made to him by Chitralekhâ.—G. K.U. ins. न खलु after सखे. N.N2. om. the stage-direction as also सखे. P. om. सखे. G.K. om. इयम् and have एव instead. G.वरोरु:, N.N2.वरा-

विदू. । कहं भवं अवगच्छुदि ।

राजा । किमत्राज्ञेयम् ।

अङ्गमनङ्गक्लिष्टं
सुखयेदन्या न मे करस्पर्शात् ।
नोच्छ्वसिति तपनकिरणै-
श्चन्द्रस्येवांशुभिः कुमुदम् ॥ १६ ॥

उर्व. । हस्तावपनीयोत्तिष्ठति । किंचिदुपसृत्य । जेदु जेदु महाराओ ।

राजा । सुन्दरि स्वागतम् । एकासने उपवेशयति ।

चित्र. । अवि सुहं वअस्सस्स ।

राजा । नन्वेतदुपपन्नम् ।

---

१ कथं भवानवगच्छति ।—२ जयतु जयतु महाराजः ।—३ अपि सुखं वयस्यस्य ।

रोहा. U. om. सेयं and has वामोरू:. P.वामोरू:. N.N_2.सैवेयम्.

1. A.कवं. A.भवअच्छुदि. B.अवगच्छिभदि for भवं अवगच्छुदि.

2. U.ज्ञेयम्. B. inserts माणवक before किं. P.om.किमत्राज्ञेयम्.

4. G.तुखयति न मेन्या करस्पर्शात्. K.U.सुखयति.

5-6.B.K.P.नोच्छ्वसति. N.N_2.चन्द्रस्यैवांशुकैः कुसुमम्. U.K.P.चन्द्रस्यैव.

7. P.A.N.N_2. make हस्तौ &c. a stage-direction for the King, and read it उर्वशीहस्तमवलम्ब्यात्तिष्ठति. B.उर्वशीहस्तमवलम्ब्योत्थाय परिष्वजते । उर्व०। किंचिद् &c. P. om. किंचिदुपसृत्य. G.जयदु जयदु. A.जअदु जअदु. B.om.2nd जेदु.

8. N.N_2. om. the whole of this speech.

9. G. om.अवि.—For from l. 7 to l. 9 U.reads as follows: उर्व०। अम्हहे । वज्जलेवघडिदं विअ मे हत्थजुअलं ण समत्थिम्हि अवणेदुं । इति तथा मुकुलिताक्षी चक्षुषोर्हस्तावपनीय ससाध्वसा तिष्ठति । रा०। हस्ताभ्यां गृहीत्वा परिवर्तयति । उ०। कथंचिदुपसृत्य । जअदु जअदु महाराओ । चित्र०। सुहं वअस्सस्स.

10. U.तदेतत् for नन्वेतद्. After महाराओ B.P.proceed: चित्र. । आवि सुहं वअस्सस्स । रा. । [B.सुंदरि स्वागतं] नन्वेतदुपपन्नं । उ । हळा देवीए &c.

उर्व. । [1]हला देवीए दिण्णो महाराओ । तदो से पणअवदी विअ सरीरसंपक्कं गदम्हि । मा खु मं पुरोभाइणिं समत्थेहि ।

विदू. । [2]केवं इह ज्जेव तुम्हाणं अत्थमिदो सुज्जो ।

राजा । उर्वशीमवलोक्य ।

देव्या दत्त इति यदि
व्यापारं व्रजसि मे शरीरेस्मिन् ।
प्रथमं कस्यानुमते
चोरितमेतत्त्वया हृदयम् ॥ १७ ॥

चित्र. । [3]वअस्स णिरुत्तरा एसा । संपदं मह विण्णप्पं सुणीअदु ।

राजा । अवहितोस्मि ।

---

१ हला देव्या दत्तो महाराजः । ततोस्याः प्रणयवतीव शरीरसंपर्कं गतास्मि । मा खलु मां पुरोभागिनीं समर्थयस्व ।—२ कथमिहैव युवयोरस्तमितः सूर्यः ।—३ वयस्य निरुत्तरैषा । सांप्रतं मम विज्ञप्तं श्रूयताम् ।

---

1. B.त्ति after महाराओ. G.K. अदो. K.U.प्पणअ°. For विअ A. N.N_2. have भविअ.

2. A.सरीरसंसग्गं इदम्हि. N.N_2.सरीरसग्गं देम्हि. U.सरीरसंगदम्हि. P. सरीरं संगदम्हि. A.N.N_2. ण for मा.—G.पुरोभागेत्ति. U.पुरोभाइणित्ति. N.N_2.समत्थहि. K.मा क्खु मं तं पुरोभागिणिं.

3. A.P.इह एव्व. U.इह ज्जेव्व. For इह ज्जेव N.N_2. have इहिं ज्जेव्व which they read after तुम्हाणं. U.अत्थिमिदो.

4. A.विलोकयन्. N.N_2. om. the whole stage-direction. B. अवलोकयन्.

5-6. P.दत्तम्. G.U.om.यदि. B.संसर्गं for व्यापारं. U.wrongly om. मे.

7-8. P.U.°मनेः for °मते. K.चोरि रहतं मे त्वया हृदयम्. P.चोरिभूय त्वया हृतं हृदयं (*sic*). A.N.N_2. चौर्याद्धृतं त्वया हृदयम्. U.wrongly चोरितं मे त्वया हृदयम्.

9. G.णिउत्तरा. N.संपदं मह विण्णअं &c. N_2.संपदं मम विण्णअं. A.P. विण्णप्पं. N.विण्णअं. G.K. मम संपदं विण्णवणा सु°. U.मम संपदं विण्णविदं सु°. B.विण्णत्तं.

चित्र. । [1]वसन्ताणन्तरे उह्णसमए भअवं सुज्जो मए उवचरिदव्वो । ता जहा इअं मे पिअसही सग्गस्स ण उक्कण्ठेदि तहा वअस्सेण कादव्वं ।

विदू. । [2]किं वा सग्गे सुमरिदव्वं । ण वा अण्हीअदि ण वा पीअदि । केवलं अणिमिसेहिं णअणेहिं मीणा विडम्बीअन्दि ।

राजा । भद्रे

अनिर्देश्यसुखः स्वर्गः कस्तं विस्मारयिष्यति ।

---

१ वसन्तानन्तरे उष्णसमये भगवान्सूर्यो मयोपचरितव्यः । तद्यथेयं मे प्रियसखी स्वर्गाय नोत्कण्ठयति तथा वयस्येन कर्तव्यम् ।—२ किं वा स्वर्गे स्मर्तव्यम् । न वाश्यते न वा पीयते । केवलमनिमिषैर्नयनैर्मीना विडम्ब्यन्ते ।

---

1. G. is corrupt here and reads वसन्ताणं कदसमए. N.N₂. वसन्ताणन्तरउदुस°. U. °णन्तरं. P. A.N.N₂B.P.उदुसमए. We with K.U.—A.N.N₂. om. भअवं. U. भवं. B.सु०ओ. B. om. मए. G. K. read the मए after उवचरिदव्वो.—P.N.N₂.U.उवअरिदव्वो.

2. G.om. ता. U.K.जधा for जहा.—G.सग्गस and has सव्वहा for जहा. N₂.सव्वधा and om. इअं. G. om. पिअ°. U.पिअ°.—A. N.N₂. ins. अण्णसङ्काए before सग्गस्स. B.जह. B.अणण्णसङ्का inserted before इअं. B.णो for मे. B.सग्गं. P.ता जन[ह?] अण्णआ सङ्कआ सग्गो ण उक्कण्ठअदि सहिए तह वअस्सेण करदव्वं. N₂. तधा for तहा. U. om. तहा. B.K. तह. For कादव्वं G. has होदव्वं.

4. G.K.P. insert भोदि before किं वा. The other Mss. omit it. B. सोग्गे.—G.हणिअदि ण वा पीअदि यदित्ति for ण &c. U.ण तत्थ खादीअदि ण पीअदि. B.अण्हिअदि. G.K. पीयदित्ति.

5. N.N₂.अणिमेसाहिं. B.अनिमि°. A.N.N₂.अच्छीहिं, U.अछेहिं, B.दिट्ठीहिं, and P.लोचनेहिं, for णअणेहिं.—G. om. मीणा. N.N₂.मिणा विभलीअन्ति for मीणा विडम्बीअन्दि. U. मीणदा अवलम्बीअदि. G.K.P. विडम्बीअदि. A.विडम्बीति.

6. U. om. भद्रे and reads वयस्य instead. P. om. भद्रे.

7. G.अनिर्दिश्य°. B.G. °सुखस्वर्गः. U.अनिर्देश्यसुखं स्वर्गं कथं विस्मारयिष्यते. P.कस्तं वा विस्मारिष्यति.

अनन्यनारीसामान्यो दासस्त्वस्याः पुरूरवाः ॥ १८ ॥

चित्र. । [1]अणुगिहीदम्हि । हला उव्वसि अकादरा भविअ विसज्जेहि मं ।

उर्व. । चित्रलेखां परिष्वज्य । [2]सहि मा खु मं विसुमरेहि ।

चित्र. । सस्मितम् । [3]वअस्सेण संगदा तुमं एव्व एदं मए जाचिदव्वा ।

[राजानं प्रणम्य निष्क्रान्ता ।

विदू. । [4]दिट्ठिआ मणोरहसंपत्तीए वड्ढदि भवं ।

राजा । इयं तावदृद्धिर्मम । पश्य ।

सामन्तमौलिमणिरञ्जितशासनाङ्कम्

एकातपत्रमवनेर्न तथा प्रभुत्वम् ।

---

१ अनुगृहीतास्मि । हला उर्वशि अकातरा भूत्वा विसर्जय माम् । —२ सखि मा खलु मां विस्मर ।— ३ वयस्येन संगता त्वमेवैतन्मया याचितव्या ।— ४ दिष्ट्या मनोरथसंपत्त्या वर्धते भवान् ।

---

1. N.N_2.दासस्त्वेष पुरूरवाः.
2. K.A.N_2.अणुगहिदम्हि. P.N.U. अणुग्गहिदम्हि. B.°गहिदम्ह.
4. U. inserts सकरुणं after परिष्वज्य. A.N.N_2.हला for सहि. K. om. सहि. U.क्खु. N.N_2 विसुमरसि. U.विसुमरेसु. B.सुमरेहि. K.विसमरेहि. P. विसुमर.
5. G. om. सस्मितम् , and reads the speech thus: अण्णोण्णसमागदा एव्वं तुमं मए जाण्दिव्वा, which N.N_2. read thus: महाराएण संगदा तुमं एव्व एदं मए जानिदव्वा. U. om. सस्मितम् and reads तुमं जेव्व एवं जाचिदव्वा. B. ins. सहि before वअस्सेण. B.तुमं एव्वेवं वाचिदव्वा. K. om. सस्मितम् , and has °गदा एव्वं तुमं मए जाचिदव्वा. P.°गदा तुमं एव्वं मए आलविदव्वा. A.जण्दिव्वा for जाचिदव्वा.
6. U.इति before राजानं. G.निःक्रान्ता.
7. N.N_2.संवदीए वड्ढदु.N_2.वड्ढदु. B. भवं वड्ढइ. G.वड्ढदि. P.भवं वध्धइ. U.दिट्ठिआ मणोरहसिद्धीए वड्ढदि भवं.
8. G.K.U.इमां तावन्मम समृद्धिं [U.मनोरथसिद्धिं instead of मम समृद्धिं] for इयं &c. B. om.पश्य.
9. N.N_2. °मणिराजित°.—N. N_2. शासनानाम्. U.°रञ्जितपादपीठम्.

अस्याः सखे चरणयोरहमद्य कान्तम्
आज्ञाकरस्त्वमधिगम्य यथा कृतार्थः ॥ १९ ॥

उर्व. । [1]णत्थि मे विहवो अदो पिअदरं मन्तिदुं ।

राजा । उर्वशीं हस्तेनावलम्ब्य । अहो विरुद्धसंवर्धन ईप्सितलाभो नाम ।

पादास्त एव शशिनः सुखयन्ति गात्रं
बाणास्त एव मदनस्य ममानुकूलाः ।
संरम्भरूक्षमिव सुन्दरि यद्यदासीत्
त्वत्संगमेन मम तत्तदिवानुनीतम् ॥ २० ॥

उर्व. । [2]अवरद्धम्हि चिरकारिआ अज्जउत्तस्स ।

राजा । मा मैवम् ।

यदेवोपनतं दुःखात्सुखं तद्रसवत्तरम् ।

---

१ नास्ति मे विभवोतः प्रियतरं मन्त्रयितुम् ।—२ अपराद्धास्मि चिरकारिकार्यपुत्रस्य ।

---

1. N.N2.कामम् for कान्तम्.
2. U.आज्ञाकरस्त्वमवाधिगम्य.
3. A.अदोवि पिअअरं मन्तिदुं. N.N2. अदोवि अवरं मन्तेदुं. U.णत्थि मे वाआविहवो अदो अवरं मन्तिदुं. B.पिअतरं. G.K.पिअं.
4. U. reads हस्तेनालम्ब्योर्वशीम्. K. हस्तेनालम्ब्य. G.अहो विरुद्धं संवर्धनः. U.अहो अविरुद्धं (may be also द्धे, it is doubtful) संवर्धनमीहितफलानाम् । पादास्त एव &c. A.°रुद्धसंपादना. N.N2.°संपादिता लाभो नाम. B.विरुद्धसंपादितेप्सितार्थलाभो. P.अविरुद्धार्थसंपादनमीप्सित°. We with G.K.—B. adds तथा हि after नाम.
6. K.U.P.मनोनुकूलाः for ममानुकूलाः.
7. A.°रूक्षम्.
8. A.तत्तदिहानुलोमम्. P.त्वत्संगमे नु मम तत्तदिवानुकूलम्. N.N2.तत्तदिहानुकूलम्. U.तत्तदिवानुनीतम्. B.त्वत्संगमेन ननु तत्तदिवानुकूलम्. K. उपनीतम्. G.अपनीतम्. We with U. and Ranganâtha.
9. P.A.N.N2.A. insert खु after °रद्धम्हि. A.N.N2.U.चिरआरिआ. B.अवरद्धा अहं चिरआलविरहआरिणी अ०अउत्तस्स. P.अवरद्धा खुम्मि चिरआलदुक्खआरिणि अ०अउत्तस्स. For अज्जउत्तस्स A.N. N2.U. have महाराअस्स.

निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ २१ ॥

विदू. । [1]भो सेविदा पदोसरमणीआ चन्दवादा । समओ खु दे वासघरपवेसस्स ।

राजा । तेन हि सख्यास्ते मार्गमादेशय ।

विदू. । [2]इदो इदो भवदी । इति निष्क्रामन्ति ।

राजा । सुन्दरि इयमिदानीमभ्यर्थना ।

उर्व. । [3]कहं विअ ।

राजा ।

अनुपनतमनोरथस्य पूर्वं
शतगुणितेव गता मम त्रियामा ।

---

१ भो सेविताः प्रदोषरमणीयाश्चन्द्रपादाः । समयः खलु ते वासगृहप्रवेशस्य ।— २ इत इतो भवती ।— ३ कथमिव ।

---

1. K.निर्वापाय.

2–3. G.U.भोदि for भो. B.वअस्स after भो.—A.पओसरमणीआ. U.प्पदोस°. G.°रमणीया. B.P.°रमणिज्जा. K.सेविदा एदे दोसरमणिज्जा. A.B.P.चन्दपादा. A.G.K.चन्दवादा.—G.K.U. insert ता before समओ.—A.N.N_2.°हर° for °घर°. U. om. खु.—U.गेहप्प° for वासघरप°. B.वासवरपवेसस्स. K.P.°घरप्प°.

4. G.K.तर्हि for तेन हि. A. om. हि. U. om. ते. B.P.आदर्शय.

5. A.P.होदी. N.N_2.U. भोदी.—G. निःक्रामतः. N.N_2.B.K.सर्वे परिक्रामन्ति, U.निःक्रामति, and K. परिक्रामतः, for इति निष्क्रामन्ति.

6. A.इत्थमिदानीं मे प्रार्थना for इयम् &c. N.N_2.इदानीमियं मे प्रार्थना, U.इयमिदानीं मे प्रार्थना. B.मे प्रार्थना, and P.अपि मे प्रार्थना, for अभ्यर्थना. We with G.K.

7. B.A.N.N_2.का for कहं. U.कीरिसी सा for कहं विअ. P.किं विअ.

9. G.अनुगत°. B.अनुपतन° (*sic*). K.अननुगत°. P.अनुपरथ°. U. अनाभिगत°. We with A.N.N_2.—N.N_2.सा मे for पूर्वम्.

10. G.शतगुणिता मे गता त्रियामा. N.N_2.शतगुणितेन (*sic* व?) पुरा गता त्रियामा. K.U.शतगुणितेव गता मम त्रियामा. B.शतगुणितामिव मे गता त्रि°. A.P.शतगुणतामिव मे गता त्रि°. We with Bollensen.

यदि तु तव समागमे तथैव
प्रसरति सुभ्रु ततः कृती भवेयम् ॥ २२ ॥

[इति निष्क्रान्ताः सर्वे ।

। तृतीयोऽङ्कः समाप्तः ।

---

2. U.प्रभवति for प्रसरति. G.K. read the following forgery after Stanza 22:

भवतानुगतेनाहमेनां हरिणलोचनाम् ।
स्मर्तव्योऽभ्यर्थयेऽहं त्वां हंहो चेतः कृताञ्जलिः ॥

3. G.निःक्रान्ताः.

| ततः प्रविशति विमनस्का चित्रलेखा सहजन्या च |

सह. | चित्रलेखां विलोक्य | सहि मिलाअमाणसदवत्तस्स विअ दे मुहस्स छाआ हिअअस्स असथ्थदं सूचेदि | ता कहेहि णिव्वेदकारणं | समदुख्खा भविदुमिच्छामि |

चित्र. | अच्छरावारपज्जाएण इहभअवदो सुज्जस्स पादमूलोवठ्ठाणं वट्टदित्ति बलिअं खु उव्वसीए उक्कण्ठिदम्हि |

---

१ सखि म्लायमानशतपत्त्रस्येव ते मुखस्य छाया हृदयस्यास्वास्थ्यं सूचयति | तत्कथय निर्वेदकारणम् | समदुःखा भवितुमिच्छामि | —२ अप्सरोवारपर्यायेणेहभगवतः सूर्यस्य पादमूलोपस्थानं वर्तत इति बलवत्खलूर्वश्या उत्काण्ठितास्मि |

2–4. G.N.N_2.अवलोक्य for विलोक्य. G.मिलिआअमाण °. A.मिलाअमाणं सदवत्तं विअ करूणा दे मुहछाआ. U.मिलायमाणसयवत्तकिसणा दे मुहछाआ. N.N_2.सहि मिलायमाणं सतवत्तं विअ किं सुण्णा दे मुहछाया-[N_2.आ] हिअअस्स असथ्थदं सूएति. B.°सदपत्तं विअ सकरूणा दे मुहछाया. P.सदपत्तलच्छि विअ सकरूणा दे मुहच्छाया.—B.A.U.सूएदि for सूचेदि P.सूअइ.U.असुथ्थिदं. B.अस्सथ्थदं. K.अस्सत्थत्तणं. A.N.णिव्वेदण°.N_2.णिवेअ°. P.°कालणं. G.K.णिव्वेदेकारणं.—U.ता कहेहि मे अणिव्वुदिकारणं जेण दे समदुक्खा होमि. B.P. omit ता. B.अणिव्वुदिकालणं | अहं वि समदुख्खा होदुं इच्छामि. A.N.N_2.P.होदुं for भविदुं.

5–6. A.N.N_2. ins. हळा before अच्छरा°&c. A.B.अच्चरा°. K.अच्छराआवारे पज्जा°.—K.तत्तभवदो for इहभवदो. A.पय्यायेण. A. N. N_2. om. इह. B. °प०आएण.—K.मूलोपठ्ठाणं.—A.N.N_2.सुज्जस्स विमाणे सह तुए णिवसन्ती बलिअं उव्वसीए उक्कण्ठिद [N_2.दे]म्हि. B.P.अच्चरावार [P.वावार] पज्जाएण [B. प०आएण] इह [P. om.]भअवदो सुज्जस्स[B.

सह. । [1]जाणे वो अण्णोण्णसिणेहं । तदो तदो ।

चित्र. । [2]तदो इमाइं दिवसाइं को णु खु वुत्तन्तोत्ति पणिधाणट्ठिदाए मए अच्चाहिदं उवलध्धं ।

सह. । सावेगम् । [3]कीरिसं विअ ।

चित्र. । [4]उव्वसी किल तं रदिसहाअं राएसिं अमच्चेसु णिवेसिदरज्जधुरं गेण्हिअ गन्धमादणवणं विहरिदुं गदा ।

---

१ जाने युवयोरन्योन्यस्नेहम् । ततस्ततः । — २ तत एतेषु दिवसेषु को नु खलु वृत्तान्त इति प्रणिधानस्थितया मयात्याहितमुपलब्धम् । — ३ कीदृशामिव । — ४ उर्वशी किल तं रतिसहायं राजर्षिममात्येषु निवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता ।

सु०अस्स] विमाणे सह तुए वसन्ती- [P.न्दि] वलिअं उव्वसीए उक्कण्ठिदम्हि. We with G.K. and Kâṭavema, the latter, however, reading वट्टन्ती for वट्टदित्ति.

1. B. inserts सावेगं before जाणे &c. A.N.N_2.अण्णोण्णगदं सिणेहं. So N.N_2., which, however, insert हला before जाणे. B. अण्णोण्णसंगदं सि°. P.जाणे अण्णोण्णसंगदं वो हिअअसिणेहं. A.N.N_2. B. om. तदो तदो.

2-3. N. om. तदो. N_2.तदा. A.दिवहाइं. P.N.N_2.दिअहाइं. B.अहाइ. K.इमाइं दिवसाइं. P.कहं for को णु खु. A.B.P. ins. से bef. वुत्तन्तो but G.N.N_2.K.U. omit it. A. वितन्ततो. B.P.उत्त°. G.पणिधाणेण दिट्ठाए[ट्ठिदाए?] मए तिए अच्चाहिदं &c. N.N_2.पणिहा[N_2.धा]णट्ठिदाए तस्स [N_2.तस्सा] अच्चाहिदं. K.पणिधाणेण ट्ठिदाए मए ताए अ°. A.तिस्सा and B.P.ताए inserted after मए. U.has neither. Kâṭavema reads the ताए. We omit the से and ताए with U. and Bollensen, for this reason that some of our Mss. read ताए, others तस्स (or तस्सा) and others again तिस्सा, and that if से and ताए stood originally in the text, we should have found सा the pronoun instead of उव्वसी in the next speech of Chitralekhâ, उव्वसी किल &c.

4. N.N_2. om. सावेगम्. A.N.N_2. केरिसं.

5-6. K.लच्छिसहाअं for रदिसहाअं. A.उव्वसी किलिदुं मदिसाहाअं तं राएसिं अमच्चाणिवेसिदरज्जधुरं गेण्हिअ गन्धमादणं गदा. N.N_2.उव्वसी किल उंमादिदा साहाअं तं राअसीं अम[N_2.अमच्च°] च्चाणिवेसिदरज्जधुरं गेण्हि-

सह. । [1]सो णाम संभोगो जो तारिसेसु पदेसेसु । तदो तदो ।

चित्र. । [2]तहिं खु मन्दाइणीए पुलिणेसु गदा सिकदापव्वदकेलीहिं कीलमाणा विज्जाधरदारिआ उदयवदी णाम तेण राएसिणा णिज्झाइदेत्ति कुविदा उव्वसी ।

सह. । [3]होदव्वं । दूरारूढो खु पणओ असहणो । तदो तदो ।

चित्र. । [4]तदो भट्टिणो अणुणअं अपडिवज्जमाणा गुरुसावसंमूढहिअआ

---

१ स नाम संभोगो यस्तादृशेषु प्रदेशेषु । ततस्ततः ।—२ तत्र खलु मन्दाकिन्याः पुलिनेषु गता सिकतापर्वतकेलीभिः क्रीडन्ती विद्याधरदारिका उदयवती नाम तेन राजर्षिणा निदिध्यासितेति कुपितोर्वशी ।—३ भवितव्यम् । दूरारूढः खलु प्रणयोसहनः । ततस्ततः ।—४ ततो भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढहृदया स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा । प्रवेशानन्तरं च कारगान्तरपरिवर्तिना लताभावेन परिणतमस्या रूपम् ।

अ गन्धमादणं गदा. B.उव्वसी कीलिदुकामा तं राएसिं अमच्चेसु णिवेसिदरज्जभरं गण्हिअ गन्धमादणं विहरिदुं गदा. P.उव्वसी किल सहात्रि (*sic*) राएसिं अमच्चेसु णिवेसिअकज्जभारं गण्णिअ गन्धमादणपव्वदे गदा विहारिदुं.—G.adds केलाससिहरप्पदेसं, and K. केलाससिहरुद्देसं, before गन्धमादणवणं.

1. A सो खु णाम. N.N₂.खु for णाम. P.B.संभोओ. G.P. do not repeat तदो. B. om. तदो तदो.

2–4. A.N.N₂.च for खु which B. omits.—B.P.तहिं अ[B.om.] मन्दाइणीपुलिणपज्जन्ते[B.प०अन्ते] कीलमाणा [P.किलमाणा] विज्जाभर-[P.°हर]दारिआ उदयवदी णाम देण[P.तेण] राएसिणा णिज्झाइदेत्ति कुविदा उव्वसी. A.N.N₂.मन्दाइणीपुलिणपेरन्ते कीलमाणा विज्जाधरदारिआ उदअवदी णाम तेण राएसिणा णिज्झाइददेत्ति[N. N₂.णिज्झातादेत्ति] कुविदा उव्वसी. K.पव्वदकीलाहिं. K. उदअवदी. K.णिज्झादेत्ति.

5. G.K.हला दूराहिरूढो प्पणओ[G. °रूढप्पणओ] असहणो होदि । अविअ [K.om.] भविदव्वदा बलवदी । तदो तदो [G.om.तदो तदो]. B.P. दूरं अहिरूढो, omitting खु. B. inserts सहि before तदो तदो.

6. G.पणअं for भट्टिणो अणुणअं. N. N₂.अणुराअं. B.P.भत्तुणो. B.पडिवज्ज°. G.K.U.अप्पाडि°. P. °सावमूढहिअआ.

इत्थिआजणपरिहरणिज्जं कुमारवणं पइट्ठा । पवेसाणन्तरं च कारणन्तरपरिअत्तिणा लदाभावेण परिणदं से रूवं ।

सह. । [1] णत्थि विहिणो अलङ्घणिज्जं । तस्स अणुराअस्स अअं णाम एक्कपदे ईरिसो अणत्थो । अह किमवत्थो सो राएसी ।

चित्र. । [2] तस्सिं एव्व काणणे पियदमं विचिण्णन्तो अहोरत्ताणि अदिवाहेदि । इमिणा उण णिव्वुदाणंपि उक्कण्ठाकारिणा मेहोदएण अणत्थाहीणो हविस्सदि ।

---

१ नास्ति विधेरलङ्घनीयम् । तस्यानुरागस्यायं नामैकपद ईदृशोनर्थः । अथ किमवस्थः स राजर्षिः ।—२ तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्राण्यतिवाहयति । एतेन पुनर्निर्वृतानामप्युत्कण्ठाकारिणा मेघोदयेनानर्थाधीनो भविष्यति ।

---

1. A.N.N₂. तं अम्हाणं परिहरणीअं for इत्थिआजणपरिहरणिज्जं. B. अम्हाणं वि पलिहलणिज्जं. P. अम्हाणं परिहरणिज्जं. N.N₂. पविट्ठा. P. N.N₂. अ for च. B. एव्व for च.

2. N₂.कारणान्तर°. B.K.P.कालन्तर°. K.P. °णिवत्तिणा. N.N₂. °वत्तिणा. U. काणणोवन्तवत्तिलदाभावेण. B.K.से परिणदं. G.A.P. रूपं.

3-4. A.N.N₂. insert हद्धी हद्धी before णत्थि &c. A.अलङ्घणीओ. B.अलङ्घणिज्जो. N.N₂. लङ्घणीओ. P.णत्थि विहिविहवो अलङ्घणिज्जो. For तस्स &c. N.N₂. तस्स णाम अणुराअस्स अअं पलिणामो संवुत्तो । अह कहिं सो राएसी [N₂. अथ किमवत्थो सो राएसी]. A.अन्तो for ईरिसो अणत्थो. B.अन्तो संवुत्तो for ईरिसो अणत्थो. K.परिणामो अण्णधा संवुत्तो for ditto. P.एक्कपदे अन्तो for एक्कपदे ईरिसो अणत्थो. G.B.सो किमवत्थो राएसी. P.अह किंअवत्थो राएसी.

5-7. N.N₂. तस्सिं ज्जेव.—A.N.N₂.पेअसिं for पियदमं. B.पिअतमं. A.अहोरत्ते. N.N₂. विच्चिण्णन्तो इद उव्वसी तद उव्वसीत्ति अहोरत्ते अदिवाहेदि. P.विइण्णन्तो. B.विइण्णन्तो अहोरत्तं वट्टइ इमिणा उण णिव्वुदाणं वि उक्कण्ठाकालिणा मेहोदयेण अणवत्थाणा हविस्सदि. P.अहोरत्तं अतिवाहेदि । इमिणा उण णिव्वुदाणंपि उक्कण्ठाकालिणा मेहोदएण अणत्थो को हविस्सदि. K. ins. नभो विलोक्य after अदिवाहेदि. A.णिव्वुत्ताणंपि. G.णिवुदाणंपि. N₂. णिव्वुदाणं वि. N.N₂.उक्कण्ठकारिणा. P. उक्कण्ठाकालिणा. G.K.मेहोदएण को णाम अणत्थो दिण्णो हविस्सदि [K.

सह. । सहि तारिसा आकिदिविसेसा चिरं दुक्खभाइणो ण होन्ति । अवस्सं किंपि अणुग्गहणिमित्तं भूओवि समागमकारणं हविस्सदि । ता एहि उदअम्मुहस्स भअवदो सुज्जस्स उवट्ठाणं करेम्ह ।

[इति निष्क्रान्ते ।

। प्रवेशकः ।

। ततः प्रविशत्युन्मत्तवेषो राजा ।

राजा । आः दुरात्मन् रक्षस्तिष्ठ तिष्ठ । क्व मे प्रियतमामादाय गच्छ-

---

१ सखि तादृशा आकृतिविशेषाश्चिरं दुःखभागिनो न भवन्ति । अवश्यं किमप्यनुग्रहनिमित्तं भूयोपि समागमकारणं भविष्यति । तदेह्युदयोन्मुखस्य भगवतः सूर्यस्योपस्थानं कुरुवः ।

हुविस्सदि]. N.N₂. हुविस्सदित्ति तक्केमि for हविस्सदि. We read अणश्थाहीणो with A.N.N₂. After हविस्सदि K. has the following: सह. । सहि कोवि अथ्थि समागमोवाओ । चि. । गोरीचरणराअसंभवं संगमणमणिं वज्जिअ कुदो से समागमोवाओ । सह. । सहि तारिसा &c.

1. B.P.om.सहि. P. एदा[रि]सो. B.°विशेसा. G. सह° for चिरं. P.om चिरं. B.चिर°. G. om. ण. A.N.N₂. read the ण before तारिसा.

2. B.किंवि. A.°णिमित्तो. B.P. भूयोपि. A.समागमो for समागमकारणं. B.पिअसमाअमो for समागमकारणं. A.हविस्सदित्ति. K.हुविस्सदित्ति. P.B.भविस्सदि.

3. G. om. ता. K. ins. प्राचीमवलोक्य before ता. A.K.उदअम्मुहस्स. B.उदयसम्मुहस्स. B. om. भअवदो. B.सु०अस्स.

4. A.करेम. B.P.करम्ह.

5. G.निःक्रान्ते.

8. P.परितो विलोक्य at the beginning, and goes on: भो राक्षस तिष्ठ तिष्ठ. B.A.N.N₂.भो भो for आः दुरात्मन्. G. does not repeat तिष्ठ.—A.N.N₂.प्रियाम्.

सि । हन्त शैलशिखराद्गगनमुत्पत्य बाणैर्मामभिवर्षति । विभाव्य ।

नवजलधरः संनद्धोयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरंपरा
कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ॥ १ ॥

विचिन्त्य । क्व नु खलु रम्भोरूर्गता स्यात् ।

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमदर्शनं नयनयोर्यातेति कोयं विधिः ॥ २ ॥

दिशोवलोक्य । सनिश्वासम् । अये परावृत्तभागधेयानां दुःखं दुःखानुबन्धि । कुतः

G.K.गम्यते for गच्छसि which we read with A.N.N_2.B.P.U.

1. G.K.U.कथं for हन्त which we read with A.N.N_2.BP.—P.B.A.K.उत्प्लुत्य for उत्पत्य. We with G.N.N_2.U.—A. ins. आत्तधन्वा, and N.N_2.आकृष्टधन्वा, and B.आकृष्टधनुः, before बाणैः. B.मां after °वर्षति. N.N_2.अभिवर्षसि. B. ins. कथं, and P. अये, after विभाव्य.

2. G.समृद्धः. G.K. have दुष्ट° for दृप्त°.

3. B.नामि for नाम.

5. P.मम नोर्वशी.

6. G.K. om. विचिन्त्य and read तत् instead. A.B.P.om. रम्भोरूः, and N.N_2. om. खलु रम्भोरूः. G.K.रम्भोरुः.

8. K.यदि for मयि.

9. K.हि for च.

10. B.अदृश्यताम् for अदर्शनम्. N.N_2.क्रमः for विधिः.

11-12. K.निःश्वस्य सास्रं. G. om. सनिश्वासम्, and G. as well as B. read अहो for अये. N.N_2. अहो for अये. N.N_2. interpolate two stanzas after सनिश्वासम् । मध्योहं[N_2. °यं] हरिभिः स्मितं हिमरुचा नेत्रे कुरङ्गीगणैः कान्तिश्चम्पककुड्मलैः कलरवो हा हा हृतः कोकिलैः । मातङ्गैर्गमनं कथं कथमहो हंसैर्विभज्याधुना कान्तारे सकलैर्विनाश्य पशुवन्नीतासि किं मानिनि ॥ चन्द्रश्चण्डकरायते मृदुगतिर्वातोपि वज्रायते माल्यं सूचिकलायते

अयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभि-
र्भवितव्यं च निरातपर्द्धिरम्यैः ॥ ३ ॥

विहस्य । मुधैव खलु मनसः परितापवृद्धिरुपेक्ष्यते । यथा मुनयोपि व्याहरन्ति राजा कालस्य कारणमिति । तत्किमहं जलदसमयं न प्रत्यादिशामि । अथ वा प्रावृषेण्यैरेव लिङ्गैर्मम राजोपचारः संप्रति । कथमिव ।

विद्युल्लेखाकनकरुचिरं श्रीवितानं ममाभ्रं

मलयजालेपः स्फुलिङ्गायते । रात्रिः कल्पशतायते विबिवशात्प्राणोपि भारायते । हा हन्त प्रमदावियोगसमयः संसारकालायते.—B. P. विलोक्य. N. N₂. °वृत्तभाग्यानां. K. G. युगपन्निपातिनो दुःखानुबन्धाः. B. P. दुःखं दुःखानुबन्धमेव. B. तथा, P. तथा हि, for कुतः and

2. B. A. N. N₂. दुरुत्सहः for सुदुःसहः which we read with G. K. P. U.

3. A. °वारिबरैः [=खरैः in the margin] for °वारिधरोदयात्. B. K. P. °वारिधरोदयैः.

4. A. भवितव्यं न निरातपार्द्धरम्यैः.—N. N₂. U. भवितव्यं च निरातपत्ररम्यैः. G. हि for च. B. K. नवातपर्द्धिरम्यैः. P. नवातपाद्धुरथ्यैः (*sic*). We read निरातपर्द्धि° with G. and Kâṭavema.

5. B. विभाव्य for विहस्य. B. वृथा and om. एव. K. मुधैव च. A. N. N₂. B. वृथैव for मुधैव. A. B. मया and P. मयैव after खलु. N. N₂. have मया but om. खलु. K. मनःपरि°. G. उपेक्षते for उपेक्ष्यते. B. उपलक्ष्यते.—G. A. तथा for यथा. B. om. अपि.

6. P. वदन्ति for व्याहरन्ति. P. om. तत्. B. P. अभ्रसमयं for जलदसमयं. G. जलदसमानयनं. A. om. अहं and reads अभ्रसमयं. N. N₂. किमिति for किम् and om. अहं and have अभ्रसमयं for जलद° &c. G. om. न.

7. K. inserts अथ वा न प्रत्यादिशामि यदा for अथ वा. G. प्रावृषेणैव For लिङ्गैः. G. K. P. चिह्नैः. G. राज्योप°.

8. P. om. संप्रति. K. संप्रति हि for संप्रति । कथमिव. B. om. कथमिव and reads संप्रति हि. G. puts a virâma after राजोपचारः and reads संप्रति हि for "संप्रति । कथमिव."

9. G. °रुचिरा. B. °रुचिरश्रीवि°.—G. श्रीविं°. N. N₂. समभ्रं for ममाभ्रम्.

व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि ।
घर्मच्छेदात्पटुतरगिरो बन्दिनो नीलकण्ठा
धाराहारोपनयनपरा नैगमाः सानुमन्तः ॥ ४ ॥

भवतु । किमेवं परिच्छदश्लाघया । यावदस्मिन्कानने तां प्रियामन्वेषयामि । विलोक्य । हन्त व्यवसितस्य मे संदीपनमिव संवृत्तम् । कुतः

आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः ।
कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥ ५ ॥

इतो गतेति कथं नु तत्रभवती मया सूचयितव्या ।

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोऽस्या
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥ ६ ॥

परिक्रम्यावलोक्य च । सहर्षम् । उपलब्धमुपलक्षणं येन तस्याः कोपनाया मार्गोऽनुमीयते ।

---

1. N.N2. निचुलरुचिभिः.
2. P.N2.B.वन्दिनो for बन्दिनो.
3. K.N.N2.धारासारोप°.
4. A.N.N2.किं मे for किमेवं. B. आत्म° for एवं. G.°श्लाघनया. P. मम किं परिच्छेदश्लाघया. G. ins. पुनः and P. अहं after यावत्. B. प्रणष्टां, P.प्रविष्टां प्रणष्टां (*sic*), and A.N.N2.प्रविष्टां, for ताम्. A.अन्विच्छामि, and B.N.N2.अन्विष्यामि.
5. B.P.परिक्रम्य for विलोक्य. A. N.N2.संतमसं वृत्तं, and B.P.संमतं, for संदीपनमिव संवृत्तम्. K. संदीपनमिदं *i. e.* इदं for इव.
7. A.सारक्त° for आरक्त°. N. N2.साळक्तकराजभिर्यं (*sic*). G. °कदली°. K.नवकन्दलैः.
8. G.कोपादन्तःसलिलैर्बाष्पैः &c. P. क्रोधादन्तर्बाष्पे. N2.बाष्पे corrected from बाष्पैः.
9. P.कुतो गतेति मया तत्रभवती सूचितव्या. A.N.N2. om. नु. N.N2. om. मया. B.इतो गता तत्रभवतीति मया सूचितव्या. G.सूचितव्या.
14. B. om. उपलक्षणम्, reading उपलब्धं तस्याः कोपनाया मार्गः येनानुमीयते.

हृतोष्ठरागैर्नयनोदबिन्दुभिर्
निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषा भिन्नगतेरसंशयं
शुकोदरश्याममिदं स्तनांशुकम् ॥ ७ ॥

विभाव्य । कथं सेन्द्रगोपं नवशाद्वलमिदम् । कुतो नु खलु निर्जने वने प्रियाप्रवृत्तिरवगमयितव्या । दृष्ट्वा । अये आसारोच्छ्वसितशैलेयस्थलीपाषाणमारूढः

आलोकयति पयोदान्
प्रबलपुरोवातताडितशिखण्डः ।
केकागर्भेण शिखी
दूरोन्नमितेन कण्ठेन ॥ ८ ॥

उपेत्य । यावदेनं पृच्छामि ।

नीलकण्ठ ममोत्कण्ठा वनेऽस्मिन्वनिता त्वया ।
दीर्घापाङ्गा सितापाङ्ग दृष्टा दृष्टिक्षमा भवेत् ॥ ९ ॥

---

1. G.हृतोनरागै:. K.हृतौष्ठ°.
5. P.कथं सेन्द्रकोपं नवशाड्वलं. B. om. कथं. B.सेन्द्रकोपमिदं नवशाड्वलं. K.G.°गोपकं.—For नव° G. वन°. K. omits. नव° altogether.
6. N.N2. om. वने. B.P. प्रियावृत्तिरव°. G.°प्रवृत्तिर्वागम°. K. A.आगम° for अवगम°. N.N2. आगन्तयितव्या (!) for अवगमयितव्या.—B.विलोक्य for दृष्ट्वा which P. omits. G.K. अयं for अये. N.N2. आसारोल्लासितशैलेयपरस्थलीपाषाणमधि°. B.अये आसारोच्छ्वसितशैलेय[प ?]टलस्थलीपाषाणमधिरूढ्य, omitting अयम्. P. °शैलेयपटलस्थगीतपाषाणमधिरूढः.
7. A.शैलेयपटलं स्थलीपाषाणं. A. अभिरूढः for आरूढः.
9. K.N.N2. °नर्तित° for °ताडित°.
11. K.दूरान्नमितेन.
12. A.प्रक्ष्यामि for पृच्छामि. G.K. भवत्वस्मात्प्रियाप्रवृत्तिमवगमेयम् (*sic*) । उपगम्य ।, and B. प्रवृत्तिरवगमेयं (*sic*) । उपेत्य । यावदेनं पृच्छामि, for उपेत्य &c. We with A. N.N2. and P., but A.N.N2. read उपेत्य *after* पृच्छामि.
13. P.हरोत्कण्ठाम् for ममोत्कण्ठा. B.धृतोत्कण्ठा.

कथमदत्त्वा प्रतिवचनं नर्तितुं प्रवृत्तः । किं नु खलु हर्षकारणमस्य । विचिन्त्य । भवतु । विदितमेतत् ।

मृदुपवनविभिन्नो मत्प्रियाविप्रणाशाद्
घनरुचिरकलापो निःसपत्नोऽस्य जातः ।
रतिविगलितबन्धे केशहस्ते सुकेश्याः
सति कुसुमसनाथे किं करोत्येष बर्ही ॥ १० ॥

भवतु । परव्यसननिर्वृतं न खल्वेनं पृच्छामि । परिक्रम्य । इयमातपान्तसंधुक्षितमदा जम्बूविटपमध्यास्ते परभृता । विहंगमेषु पण्डिता जातिरेषा । यावदेनामभ्यर्थये ।

त्वां कामिनो मदनदूतिमुदाहरन्ति
मानावभङ्गनिपुणं त्वममोघमस्त्रम् ।
तामानय प्रियतमां मम वा समीपं

---

1. N.N₂.वचनं for प्रतिवचनं. For नर्तितुं प्रवृत्तः G. has प्रवृत्तनृत्तसंवृत्तः, K.प्रवृत्तनृत्तः संपन्नः, N.N₂. simply प्रवृत्तः, and A.P. प्रनृत्तः. U.नर्तितुमारब्धम्. We with B.—A.प्रहर्ष°.

2. B.P. om. भवतु । विदितमेतत् and read the first pâda of the following stanza thus: भवतु भवतु दृष्टं मत्प्रियाविप्रणाशात् [P. विप्रयोगात्]. K.reads the pâda thus: मृदुपवनविभिन्नो मत्प्रियाया विनाशात्.—A. N. N₂.दृष्टम् for विदितमेतत्.

3. A.N.N₂.विधूतो for विभिन्नो.

4. N.N₂.वनरुचिर° (*sic*). K.नवरुचिर°. B.P.अद्य for अस्य.

5. U.G.K. read केशपाशे, for केशहस्ते which we read with A.N.N₂.B.P.

6. B.P.करोतु, and K.हरेत्, for करोति.

7. B. om. भवतु.—K.A.B.प्रक्ष्यामि, G.द्रक्ष्यामि, and P.प्रवक्ष्यामि, for पृच्छामि. K. om. the prose from इयं up to अभ्यर्थये. G. inserts अये before इयम्.

8. For आतपान्त° G. has तपात्यय°. P.आतपात्ययजनितमदा. P.°विटपमध्यमध्या°. B.P.परभृतिका. G.B.P.विहंगेषु.

9. G. पण्डितैषा जातिः. N.N₂.पण्डितजातिरेषा.—A.N.N₂.भवति मातः after अभ्यर्थये.

10. B.कामिनां.

11. N.N₂.°रुचिरं for °निपुणं. K. अनङ्ग° for अमोघ°.

12. B.P.सकाशं for समीपं.

मां वा नयाशु कलभाषिणि यत्र कान्ता ॥ ११ ॥

किमाह भवती । कथं त्वामेवमनुरक्तं विहाय गतेति । शृणोतु भवती ।

कुपिता न तु कोपकारणं
सकृदप्यात्मगतं स्मराम्यहम् ।
प्रभुता रमणेषु योषितां
न हि भावस्खलितान्यपेक्षते ॥ १२ ॥

कथं कथाच्छेदकारिणी स्वकार्य एव सक्ता ।

महदपि परदुःखं शीतलं सम्यगाहुः
प्रणयमगणयित्वा यन्ममापद्गतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फलमभिमुखपाकं राजजम्बूद्रुमस्य ॥ १३ ॥

एवंगतेपि प्रियेव मे मञ्जुस्वनेति न कोपोस्याम् । इतो वयम्-
परिक्रामितकेन । कर्णं दत्त्वा । अये दक्षिणेन प्रियाचरणनिक्षेपशं-

1. B.नस्व[नयस्व?]. P.नयस्व.
2-3. B.N.N2. om. एवम्.—B. शृणोतु तावत् for शृणोतु भवती. K. adds तत् after शृणोतु.
5. B. आत्मकृतं.
7. K.A.B.भाव:. B.तु for हि. A. N.N2.B.अपेक्ष्यते for अपेक्षते. K. न हि भाव: स्खलितान्यपेक्षते.
8. P.A.विलोक्य before कथम्. G. K.स्वकार्ये प्रवृत्ता. N.N2.एवासक्ता.
9. K. adds अथ वा before महदपि &c.
10. For आपद्गतस्य G. has उपद्रुतस्य.
11. N.N2.एव for एषा.
12. For अभिमुख° G. K. have अभिनव°.
13. A.एवं गतेपि प्रिये मञ्जुस्वनेति न कोपोस्याम्. B.एवं गते विप्रिये मञ्जुस्वनेति न मे कोपोस्याम्. P.एवं गतापि प्रियेव मञ्जुस्वनेति न कोपोस्याम्. K.एवं गतायामपि प्रियायामिव मञ्जुस्वने न कोपोस्याम्. U.तदेवं गतेपि प्रियेव मे मञ्जुस्वनेति न मे कोपोस्याम्. G.एवंगतायामपि प्रियायामिव मे मञ्जुस्वने न कोपोस्याम्. N.N2.एवंगते (omitting अपि).—A. N. N2. om. मे. P. om. इतो वयम्.
14. N.N2.परिक्रामितेन. G.K ins. वनं after दक्षिणेन, but B.P.A. N.N2. omit it.

सी नूपुररवः । यावदत्र गच्छामि । परिक्रम्य । अहो धिक् धिक् ।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसाम् ।
कूजितं राजहंसानां नेदं नूपुरसिञ्जितम् ॥ १४ ॥

भवतु । यावदेते मानसोत्सुकाः पतत्रिणः सरसो नोत्पतन्ति तावदेतेभ्यः प्रियाप्रवृत्तिरवगमयितव्या । उपेत्य । भो भो जलविहंगमराज

पश्चात्सरः प्रति गमिष्यसि मानसं तत्
पाथेयमुत्सृज बिसं ग्रहणाय भूयः ।
मां तावदुद्धर शुचो दयिताप्रवृत्त्या
स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव ॥ १५ ॥

पर्योन्मुखो विलोकयति । मानसोत्सुकेन मया न लक्षितेत्येवं वचनमाह ।

We with G.K. and also U. which however reads वनभारां. A.P.K. °विक्षेप°.

1. G. K. read °शब्दः for °रवः. B. adds श्रूयते after नूपुर° &c. B.A.N₂.अवलोक्य च and N.अवलोक्य after परिक्रम्य. N.N₂. do not repeat धिक्.

2. N.N₂. °मानसाम् for °चेतसाम्.

3. P.कलहंसानां. A. °सञ्जितं for कूजितं. B.नैतन्नूपुर°. P. °शिञ्जितम्. K. °शब्दितम्. G. °सञ्जितम् for °सिञ्जितम्.

4. A.N.N₂. om. भवतु. P. om. पतत्रिणः. B.स्वरसे[सरसे?]. P.सरसः समुत्पतन्ति, omitting न.

5-6. A.N.N₂.प्रियोदन्तं for प्रियाप्रवृत्तिः. A.N.N₂.अभिगच्छेयं for अवगमयितव्या. P.अवगन्तव्या.—P.उपसृत्य for उपेत्य—A.भो हंसवर विहङ्गराज. N.N₂.भो हंस विहंगराज. B.भो भो हंस जल विहंगराज. P. भो हंस जलचर विहंगराज. K.भो भो विहंगराज.

7. G.K.त्वं for तत्.

8. P.पाथेय°. G.बिशग्रहणाय. B. बिसः ग्रह°[for बिसग्रह°?].

9. G.उद्धतशुचो.

10. K.परं for सतां. B.बहुमता for गुरुतरा. G.प्रणय° for प्रणयि°.

11. K. adds तिर्यगवलोक्य अये before पर्यो°. K.पर्योन्मुखमवलोकयति. B. पर्योन्मुखं. G.पया°. B. न दृष्टमित्यवचनम्. N.N₂.अयम् for एवम्. P. om. एवम्. K.कथंवचनमाम् for वचनम्.

यदि हंस गता न ते नतभ्रूः
सरसो रोधसि दर्शनं प्रिया मे ।
मदखेलपदं कथं नु तस्याः
सकलं चोर गतं त्वया गृहीतम् ॥ १६ ॥

अतश्च

हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता ।
विभावितैकदेशेन देयं यदभियुज्यते ॥ १७ ॥

विहस्य । एष चोरानुशासी राजेति भयादुत्पतितः । परिक्रम्य । अयमिदानीं प्रियासहायश्चक्रवाकः । तावदेनं पृच्छामि ।

रथाङ्गनामन् वियुतो रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी मनोरथशतैर्वृतः ॥ १८ ॥

कथं कः क इत्याह । मा तावत् । न खलु विदितोहमस्य ।

सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥ १९ ॥

1. N.ते नु सुभ्रूः for ते नतभ्रूः.
3. G. पदखेल°.
4. N.N_2.चोरयता for चोर गतम्.
5. B.सानुसङ्गमनुस्मरन्. and A.N.N_2.साभियोगम्, for अतश्च. P.om. अतश्च.
6. K.P.गतिस्तस्याः. P.हृता त्वया. B.गतिस्त्वस्याः.
7. N.N_2.विभाति नैकदेशेन.—N.N_2.स्तेयं तदपि युज्यते for देयं &c.B.P.K.स्तेयं यदभियुज्यते.
8-9. B.A.N.N_2.दृष्ट्वा before विहस्य which B.P.omit. G.ins. अये before एष. A.N.N_2.स्तेनशासी. P.स्तेयानुशासी. B.om. राजा. P.अवलोक्य च after परिक्रम्य. A. अयं हीदानीं प्रियासहायश्चक्रवाकः यावदेनं पृच्छामि. G.K.इममिदानीं प्रियासहायं चक्रवाकं प्र[K.द्र]क्ष्यामि. B.P.इदानीं प्रियासहायं चक्रवाकं प्रक्ष्यामि[P.पृच्छामि].
12. G.N.N_2.do not repeat कः.—N.N_2.om.कथम्. G.K.अये for मा. P.मा खलु विदितोहमस्य. B.अयं कः क इत्याह माम् । न खलु विदितोहमस्य.
14. G.P.स्वयंवृत°. B.स्वयंभूत°.K.स-

कथं तूष्णीं स्थितः । भवतु । उपालप्स्ये तावदेनम् ।

सरसि नलिनीपत्त्रेणापि त्वमावृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतो जायास्नेहात्पृथक्स्थितिभीरुता
मयि च विधुरे भावः कान्ताप्रवृत्तिपराङ्मुखः ॥ २० ॥

सर्वथा मदीयानां भागधेयानां विपर्ययेण प्रभावप्रकाशः । यावदन्यमवकाशमवगाहे । पदान्तरे स्थित्वा । भवतु न तावद्गच्छामि ।

इदं रुणद्धि मां पद्ममन्तःकूजितषट्पदम् ।
मया दष्टाधरं तस्याः ससीत्कारमिवाननम् ॥ २१ ॥

भवतु । अस्मिन्नेव कमलाभ्यासिनि मधुकरे प्रणयित्वं करिष्ये । इतो गतस्यानुशयो मा भूदिति ।

मं वृतः पतिस्ताभ्यामुर्वश्या च भुवा च यः.

1. G.om.कथं तूष्णीं स्थितः. P.किं, and B.अयं, for कथं. B.आस्थितः for स्थितः. P.भवस्य[न्त?]वोपलप्स्ये तावदेतं. B.उपलप्स्ये.

2. G.सरस°.

4. B.P.हि for च. G. has मिथः° for पृथक्°.

5. P.तु for च. K.कोपं for कान्ता°.

6-7. A.भाग्यविपर्यासानां प्रभावः for भागधेयानां विपर्ययेण प्रभावप्रकाशः. N. भाग्यानां विपर्यासः, N2.भाग्यानां विपर्ययः, for the same. K.सर्वथा मदीयानां भागधेयानां विपर्ययेण प्रभवेद्यावदाकारः for विपर्ययेण प्रभावप्रकाशः. B.सर्वथायं मदीयानां भागधेयानां प्रभावः. P.[omitting सर्वथा] मदीयानां भाग्यविपर्यासानां प्रभावोयम् । भवत्वन्यदेव काननमवगाहिष्ये । पदान्तरे स्थित्वा । इदानीमेवमवगच्छामि । इदं रुणद्धि &c. B.A.N.N2.om.यावत्. A.N.N2. ins. एव after अन्यम्. B.P.A. °गाहिष्ये. N.N2. °गाहयिष्ये. B.om.न. G.has गमिष्यामि, for गच्छामि.

8. P.अब्जं for पद्मं. G.K. °क्वणित°. for °कूजित°.

10-11. A.भवतु सानुशयोहमस्मिन्कमलसेविनि भ्रमरे प्रणयित्वं करिष्ये. N. N2.भवतु सानुशयोहमस्मिन्कमले विनिर्गतभ्रमरे प्रणयित्वं करिष्ये. A.N. om. from इतो up to भूदिति. U. इतो गतस्यानुशयो मा भूदित्यस्मिन्नपि कमलसेविनि भ्रमरे प्रणयं करिष्ये. B.सानुशयोहमस्मिन्नेव कमलसेविनि भ्रमरे प्रणयित्वं करिष्ये । मधुकर &c.

मधुकर मदिराक्ष्याः शंस तस्याः प्रवृत्तिं

विभाव्य ।

वरतनुरथ वा ते नैव दृष्टा प्रिया मे ।
यदि सुरभिमवाप्स्यस्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत्पुण्डरीके किमस्मिन् ॥ २२ ॥

साधयामस्तावत् । परिक्रामितकेन । एष नीपस्कन्धनिषण्णहस्तः करिणीसहायो नागराजस्तिष्ठति । अस्मात्प्रियोदन्तमुपलप्स्ये ।

विलोक्य । भवतु न त्वरा कार्या ।

अयमचिरोद्गतपल्लव-
मुपनीतं प्रियकरेणुहस्तेन ।
अभिलषतु तावदासव-
सुरभिरसं सल्लकीभङ्गम् ॥ २३ ॥

क्षणमात्रं स्थित्वा । हन्त कृताह्निकः संवृत्तः । भवतु पृच्छामि

P.इतो गतः सनुशयोहमस्मिन्नेव कमलसेविनि मधुकरे प्रणयं करिष्ये । मधुकर &c. We with G.K.

1. P.मदिरेक्ष्याः.
2. P.B. om. विभाव्य.
3. G.K.U. have असौ for ते.
4. N.N₂. °मुखाम्भोज°. B.°मखोस्त्वासि° (*sic*). For °गन्धं G. has °वातम्.
6. G.परिक्रामतिकेन. B.P.परिक्रम्य for परिक्रामितकेन. B.नीपस्कन्धे निषण्ण°. G.K.°निषण्णः.
7. A.प्रियासहायो. N.N₂.प्रियासहचरो. G.करणी°. P.B.गजराजस्तिष्ठति. G. has अस्ति for तिष्ठति. G. K.प्रियाप्रवृत्तिम् for प्रियोदन्तम्. G. A.N.N₂.उपालप्स्ये.
8. For विलोक्य । भवतु न त्वरा कार्या, G.K. have " यावदुपसर्पामि । विलोक्य । हन्त न तावदुपसर्पणकालः".
9. N.N₂.अचिराहृतपल्लवम्.
10. P.प्रियकरेण हस्तेन.
11-12. N.N₂. read the 3rd and 4th pâdas thus: अभिलषतु तावदास्यासवसुरभि सल्लकीकुसुमम्. K.°लषति. P.अनुभवति for अभिलषतु.
13. P. क्षणं for क्षणमात्रं. B.P. om. from हन्त to पृच्छामि.—A. N.N₂.om. भवतु.

मदकलयुवतिशशिकला
गजयूथप यूथिकाशबलकेशी ।
स्थिरयौवना स्थिता ते
दूरालोके सुखालोका ॥ २४ ॥

सहर्षम् । अनेन स्निग्धमन्द्रेण गर्जितेन प्रियोपलम्भशंसिना समाश्वासितोस्मि । साधर्म्याच्च त्वयि मे भूयसी प्रीतिः ।

मामाहुः पृथिवीभृतामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं ममाप्यर्थिषु ।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा
सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः ॥ २५ ॥

सुखमास्तां भवान् । साधयामस्तावत् । पार्श्वतो दृष्टिं दत्त्वा । अये सुरभिकन्दरो नाम विशेषरमणीयः सानुमानालोक्यते । प्रियश्चायमप्सरसाम् । अपि नाम सुतनुरस्योपत्यकायामुपलभ्येत । परिक्रम्यावलोक्य च । हन्त मदीयैर्दुरितपरिणामैर्मेघोपि शतह्रदाशू-

1. N.N₂. मदकलकलभकरोरू: for the first pâda. We with G. A.B.P.K.

5-6. A.N.N₂. insert भवतः before स्निग्धमन्द्रेण. G.K.अनेन भवतः[K.om.] प्रियोपलब्धि[°लब्धि G. om.]शंसिना मन्द्रेण कण्ठ[G. m.]गर्जितेन समाश्वासितोस्मि. B. P.om.त्वयि. G. om. मे, and B. reads मे after भूयसी. B.P. ins. कथमिव and K. कथमिति after प्रीतिः.

7. A.B.पृथिवीक्षितां.

8. A.अथ for अपि.

10. A.N.N₂. सर्वे. P.सर्वां मामनु ते क्रिया विरहजां त्वं तु व्यथां मानुभूः.

11. N.N₂.सुस्थम् for सुखम्. P. om. सुखमास्तां भवान् and has साधु यानु तावत् । पार्श्वतो दृष्ट्वा । अये अयं. A.N.N₂.K.अयं for अये.

12. A.om. नाम. P.A.N.N₂.om. आलोक्यते. B.रमणीयप्रियाश्चाप्सरसः for प्रियश्चायमप्सरसाम्. P.प्रियश्चाप्सरसां.

13. A.N.N₂.सुतनुरस्मिन्नुपलभ्येत. G. सुतनुरस्योपपत्तिकायामुपलभ्यते. P. तावत् for सुतनुः. K.P.उपलभ्यते.

14. After च K.proceeds:—कथमन्धकारः भवतु विद्युत्प्रकाशेनावलोक-

न्यः संवृत्तः । तथापि शिलोच्चयमेतमपृष्ट्वा न निवर्तिष्ये ।

अपिं वनान्तरमल्पकुचान्तरा
श्रयति पर्वत पर्वसु संनता ।
इदमनङ्गपरिग्रहमङ्गना
पृथुनितम्ब नितम्बवती तव ॥ २६ ॥

कथं तूष्णीमास्ते । शङ्के विप्रकृष्टो न शृणोतीति । समीपेस्य गत्वा पुनरेनं पृच्छामि । परिक्रम्य ।

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनोद्देशे मया विरहिता त्वया ॥ २७ ॥

आकर्ण्य । सहर्षम् । कथं यथाक्रमं दृष्टेत्याह । भवानप्यतः प्रियतरं

यामि हन्त &c. N.N2.दोषैः for दुरितपरिणामैः. P.दुरितपाकैः. K. दुरितैः.

1. For शिलोच्चयम्, G.K. read शैलम्, B.तथापि शैलोच्चयं पृष्ट्वैव निवर्तिष्ये. P.तथापि शिलोच्चयमेतमपृष्ट्वा न निवर्तिष्ये. N.N2.om.एतम्. N. N2.दृष्ट्वा. G.तथापि न शैलमदृष्ट्वैनं निवर्तिष्यते. K.तथापि शैलमपृच्छ्यैनं (*sic*) न निवर्तिष्ये. A.तथापि शिलोच्चयमद्[corrected into पृ]ष्ट्वा न निवर्तिष्ये. U.तथापि शिलोच्चयमेनं दृष्ट्वा न निवर्तिष्ये (*sic.*).

2. A.N.N2. introduce the stanza with the stage-direction संमुखं स्थित्वा. B. reads the fourth pâda (पृथु° &c.) as the second, and the second (श्रयति &c.) as the fourth.—A.N.N2.B. °भुजान्तरा for °कुचान्तरा.

3. A.संतता, and N.N2. संश्रिता, for संनता.

6-7. A.विप्रकर्षात् for विप्रकृष्टः. N. विवृण्वन्नपि, and N2.विशृण्वन्नपि, for विप्रकृष्टो न. B.विप्रकर्षान्न शृणोतीति शङ्के । भवतु समीपमेवास्य गत्वा पुनरेनमेवं प्रक्ष्यामि । तथा कृत्वा । सर्वक्षिति° &c. P.विप्रकर्षान्न शृणोतीति मन्ये । हन्तास्य समीपमेव गत्वा पुनरेनं पृच्छामि । तथा कृत्वा । सर्वक्षिति°&c. K.om. शङ्के विप्रकृष्टो न शृणोतीति.—G. om. इति. A. N.N2.K.समीपं for समीपे before which A. reads भवतु. G. has the word पुनः before गत्वा. A.प्रक्ष्यामि. A.N.N2.तथा कृत्वा for परिक्रम्य.

9. P.रम्य°.N.N2.वनान्तेस्मिन् for वनोद्देशे. G.K.त्वया विरहिता मया.

10. G.K. ins. नेपथ्ये तदेव before आकर्ण्य सहर्षं, which P. omits.

शृणोतु । क्क तर्हि मम प्रियतमा । नेपथ्ये तदेवाकर्ण्य । हा धिक् ममैवायं कन्दरमुखविसर्पी प्रतिशब्दः । विषादं रूपयित्वा । श्रान्तोऽस्मि । अस्यास्तावद्गिरिनद्यास्तीरे स्थितस्तरङ्गवातमासेविष्ये । इमां नवाम्बुकलुषामपि स्रोतोवहां पश्यतो मे रमते मनः ।

तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।
पदा विद्धं यान्ती स्खलितमभिसंधाय बहुशो
नदीभावेनेयं ध्रुवमसहना सा परिणता ॥ २८ ॥

भवतु । याचिष्ये तावदेनाम् । अञ्जलिं कृत्वा ।

P.अदृष्टेत्याह । भवानप्यत:परं शृणोतु । क्क तर्हि मे प्रियतमा । अहो धिक् मद्व्यवसायं । कन्दरविसर्पिप्रतिशब्दः । विषादं रूपयित्वा । परिश्रान्तोऽस्मि । अस्यास्तावद्गिरिनद्यास्तीरे तरङ्गमारुतमासेविष्ये । विलोक्य । इमां नवाम्बुकलुषामपि स्रोतोवहां पश्यतो मे रमते मनः. G.K. insert भवतु after आह. G.K.अत: परं प्रियं for अत: प्रियतरं. A.N.N2. also insert the परं after अत:.

1. A.B. मे for मम. N.N2. क्क हि ते प्रियतमा for क्क तर्हि &c. A.N.N2.पुनरेतत् for नेपथ्ये तत्. B. विभाव्य for नेपथ्ये तदेवाकर्ण्य. A.B.अहो for हा. N.N2.om. हा altogether.

2. N.om. अयम्. A.N.N2.गुहामुख°. K.कन्दरामुखसर्पी. G.°मुखसर्पी. G. ins. हा प्रिये उर्वशि इति, and K. ins. हा प्रिये उर्वशि इति मूर्छितः पतति । उत्थायोपविश्य, before विषादं रूप° &c. A.परिश्रान्तोऽस्मि.

3. B.om.तीरे स्थित:. K.तीरस्थित:. G.om. °वातम्. B.K.मारुतम्. B. विलोक्य, and K.तथा कृत्वा, after आसेविष्ये.

4. B.G.श्रोतोवहां and N.N2.गिरिनदीं for स्रोतोवहां. G.K.इमां तावन्नवाम्भ:कलुषामपि [G.om.अपि]पश्यतो मे रमते मन: [G.मनो मे रमते]. A.B.K. ins. कुत: after मन:.

5. A.N.N2.P. °रशना.

7. A.N.N2.P.यथाखेलं, and B. यथाविद्धं, for पदा विद्धं which we read with K.U.—P.याति. B. अतिसंधाय.

8. A.B.असहमाना for असहना सा. We with G.N.N2.K.

9. For याचिष्ये तावत् G.K. have प्रसादयामि. B.K.बद्ध्वा for कृत्वा. P.om. अञ्जलिं कृत्वा.

त्वयि निबद्धरतेः प्रियवादिनः
प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवं मम पश्यसि
त्यजसि मानिनि दासजनं यतः ॥ २९ ॥

अथ वा परमार्थसरिदेवैषा । न खलूर्वशी पुरूरवसमपहाय समुद्राभिसारिणी भविष्यति । भवतु । अनिर्वेदप्राप्याणि श्रेयांसि । यावदमुमेव प्रदेशं गच्छामि यत्र मे नयनयोः सुनयना तिरोभूता । परिक्रम्यावलोक्य । हन्त दृष्टमुपलक्षणं तस्या मार्गस्य ।

रक्तकदम्बः सोयं
प्रियया घर्मान्तशंसि यस्यैकम् ।
कुसुममसमग्रकेसर-
विषममपि कृतं शिखाभरणम् ॥ ३० ॥

विलोक्य । इमं तावत्प्रियाप्रवृत्तिनिमित्तं सारङ्गमासीनमभ्यर्थये ।

---

1. G.निबद्धरते.
3. G.शङ्कसे for पश्यसि. K. मन्यसे.
5. A.B. ins. विचिन्त्य, and K. कथं तूष्णीमास्ते, before अथ वा &c. N.N2. om. एव. B.अथ वा परमार्थतः सरिदेवेयं । उर्वशी पुरूरवसमपहाय न समुद्राभि° &c. K.अथ वा परमार्थं सरिदियं । नोर्वशी कथमन्यथा पुरू° &c. P.परमार्थतः सरिदेवेयं नोर्वशी पुरूरवसं विहाय &c.
6-7. A.N.N2.भवति for भविष्यति. K. om.भवतु. A.B. ins. नाम after श्रेयांसि. For अमुं, G.K.read तं. N.N2.निर्वेदप्राप्याणि श्रेयांसि भवन्ति. For मे, G.K. have मत्°.— For सुनयना, G.K. read सुवदना.
8. P.A.N.N2. om. the stage-direction for which B. has only विभाव्य. K. च after अवलोक्य. B.P. om. हन्त.
13. A.B.परिक्रम्य and N.N2.परिक्रम्याशोकमवलोक्य for विलोक्य, which P. omits. A.प्रियावृत्तान्तोपलम्भाय. N.N2.प्रियावृत्तान्तोपालम्भाय. B.P.अमुं तावत्प्रियावृत्तान्ताय सारङ्गमासीन[P.आसन्नं]मभ्यर्थये. N.N2. before इमं तावत् &c. read as follows:

रक्ताशोक कृशोदरी क नु गता
त्यक्त्वानुरक्तं जनं
पवनधूयमानमूर्धानमवलोक्य ।
नो दृष्टेति मुधैव चालयसि य-

कृष्णशारच्छविर्योऽसौ दृश्यते काननश्रिया ।
वनशोभावलोकाय कटाक्ष इव पातितः ॥ ३१ ॥

विलोक्य । किं नु खलु मामवधीरयन्निवान्यतोमुखः संवृत्तः । दृष्ट्वा ।

अस्यान्तिकमायान्ती
शिशुना स्तनपायिना मृगी रुद्धा ।
तामयमनन्यदृष्टि-
र्भुग्नग्रीवो विलोकयति ॥ ३२ ॥

हंहो यूथपते

अपि दृष्टवानसि मम प्रियां वने
कथयामि ते तदुपलक्षणं शृणु ।
पृथुलोचना सहचरी यथैव ते
सुभगं तथैव खलु सापि वीक्षते ॥ ३३ ॥

कथमनादृत्य मद्वचनं कलत्राभिमुखं स्थितः । उपपद्यते । परिभ-

ह्वाताभिभूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटा-
संघट्टघृष्ट[.N2.ष्ट]च्छदः
तत्पादाहतिमन्तरेण भवतः
पुष्पोद्गमोऽयं कुतः ॥

For अभ्यर्थये G.K. read अभ्यर्थयिष्ये.

1. The Mss. कृष्णसार°. We with Kâṭavema. G. °स्थविः for °च्छविः G.K.लक्ष्यते for दृश्यते. N.N2. read the stanza thus: कृष्णसारच्छविर्यासौ[corrected from °योंसौ in both] दृश्यते काननप्रिया । वनशोभावतो-(*sic*)काय कटाक्ष इव पातितः, a correction apparently into hopeless corruption!

2. G.K.मेघकालावलोकाय. U.वनश्रष्याव°. We with B.P.A. N.N2.

3. For विलोक्य, G.K. उपसृत्य. B. P. om. विलोक्य. N.N2. om. नु. K. ins. एव after माम्. P.om. इव. G. om. दृष्ट्वा.

4. B. ins. अये २ before अस्य &c. A.यस्य for अस्य.

6. K.मां for तां.

7. G.भग्नग्रीवो.—For विलोकयति, G. K. अवलोकयति.

8. B.अहो for हंहो. B.A.N.N2. हरिणयूथ°.

9. A.न वा, and G.सखे, for वने.

12. K.सुभगा. N.N2.सा विलोक्यते for सापि वीक्षते. K.वीक्ष्यते.

13. For मत्°,G. has मदीयं. A.N.

घास्पदं दशाविपर्ययः । इतो वयं— परिक्रामितकेनावलोक्य । शिलाभेदान्तरगतं किमेतदालोक्यते ।

प्रभालेपी नायं हरिहतमृगस्यामिषलवः
स्फुलिङ्गः स्यादग्नेर्गगनमभिवृष्टं पुनरिदम् ।

विभाव्य ।

अये रक्ताशोकस्तबकसमरागो मणिरयं
यमुद्धर्तुं पूषा व्यवसित इवालम्बितकरः ॥ ३४ ॥

हरति मे मनः । आदास्ये तावदेनम् । अथ वा

मन्दारपुष्पैरधिवासितायां
यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया संप्रति दुर्लभा मे

N_2.कलत्राभिमुखः संवृत्तः. B.कलत्राभिमुखस्थितः. G.K.कान्ताभिमुखं प्रस्थितः.—G.उपयुज्यते for उपपद्यते. A.N.N_2. ins. हि after उपपद्यते.

1. P. ins. मे after °स्पदं. A.N. °विपर्यासः, and N_2. °विपर्यासं (*sic*), for °विपर्ययः. G.K. insert सुखमास्तां भवान् after °विपर्ययः.—P.गच्छामः after इतो वयम्. G. परिक्रामितकेन. P.पुरो before अवलोक्य.—N. bef. इतो वयम् has:—

क्वाकार्यं शशलक्ष्मणः क्व च कुलं
भूयोपि सा दृश्यते
दोषाणामुपशान्तये श्रुतमहो
कोपेपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः
स्वप्नेपि सा दुर्लभा
चेतःस्वास्थ्यमुपैहि कः खलु युवा
धन्योधरं धास्यति ॥

G.K. insert अये किं नु खलु after अवलोक्य.

2. A.N.किमिदं for किमेतद्. G.K. A. ins. नितान्तरक्तम्, and N. N_2. नितान्तरक्तं भेदान्तर्गते[तं?], before आलोक्यते.
3. N.N_2.प्रभातेपीनोयम् (=प्रभाते पीनोयम्). A.B.K.प्रभालेपी नोयं.
4. G.K.वह्नेः for अग्नेः. K.P.गहनम् for गगनम्.
5. N.N_2.om. विभाव्य.
6. N.N_2.अयं for अये. B.P.°प्रसव° for °स्तबक°.
7. N.N_2.K.P.समुद्धर्तुम् for यमुद्धर्तुम्.—For व्यवसितः, G. has अध्यवसितः.—A. आसाञ्जित°, and N. N_2.आसिञ्जित°, for आलम्बित°.
8. B.ins.अहो अयं before हरति.
10. K.P.तस्याः for यस्याः.

किमेनमस्त्रोपहतं करोमि ॥ ३५ ॥

नेपथ्ये । वत्स गृह्यतां गृह्यताम् ।

संगमनीय इति मणिः
शैलसुताचरणरागयोनिरयम् ।
आवहति धार्यमाणः
संगममचिरात्प्रियजनेन ॥ ३६ ॥

राजा । कर्णं दत्त्वा । को नु खलु मामेवमनुशास्ति । दिशोऽवलोक्य । अये अनुकम्पते मां कश्चिन्मृगचारी मुनिर्भगवान् । भगवन् अनुगृहीतोऽस्म्यहमुपदेशाद्भवतः । मणिमादाय । हंहो संगमनीय

तया वियुक्तस्य विलग्नमध्यया
भविष्यसि त्वं यदि संगमाय मे ।
ततः करिष्यामि भवन्तमात्मनः
शिखामणिं बालमिवेन्दुमीश्वरः ॥ ३७ ॥

---

1. G.अस्त्रोपहतम्. B.आस्रोप°. K. अश्रूप°. P.आस्राभिहतं.
2. A.N.N2.B.U.om.वत्स, and G.K. do not repeat गृह्यताम्. B. reads संगृह्यतां २.
3. K.U.मणिरिह for इति मणिः.
6. U.आशु for अचिरात्. N.N2. प्रियजनस्य.
7-9. A.का खलु मामेवमनुशास्ति. G.को मामेवानुशास्ता and N.N2. B. को नु खलु मामेवमनुशास्ते[B °शास्ति]. K.को नु मामेवं शास्ते. P. को नु खलु मामनुकम्पते । विभाव्य । अयि अनुकम्पते मां भगवान्गजचर्मवासाः । भगवन्ननुगृहीतोऽस्मि. N.N2. om. दिशोऽवलोक्य and read अयमनुगृह्णते[?गृह्णीते?] मां भगवान्गजचर्मवासाः. G.K.omit मां.—After मां A. goes on thus: भगवान् गजचर्मवासाः, and B. भगवान्मृगचर्मधारी भर्गः । भगवन् अनुगृहीतोऽस्मि महतोऽस्मादुपदेशात्. K.कश्चन मुनिर्मृगचारी भगवान् अनुगृहीतोऽस्मि अहमुपदेशाद्भवतः. G. omits भगवन्. N.N2. om.अहम्.B.अयि for हंहो. P.भये.
10. G.N.N2.विमुक्तस्य.
12. G.तदा.
13. G.शिषामणिं.

परिक्रम्यावलोक्य च । अये किं नु खलु कुसुमरहितामपि लतामिमां पश्यतो मे रतिरुपलब्धा । अथ वा स्थाने मनोरमा ममेयम् । इयं हि

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।
चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥ ३८ ॥

यावदस्याः प्रियानुकारिण्याः परिष्वङ्गप्रणयी भवामि । इति लतामालिङ्गति ।

। ततः प्रविशति तत्स्थान एवोर्वशी ।

राजा । निमीलिताक्ष एव स्पर्शं रूपयित्वा । अये उर्वशीगात्रसंपर्कादिव निर्वृतं मे शरीरम् । तथापि न पुनरस्ति विश्वासः । कुतः

समर्थये यत्प्रथमं प्रियां प्रति
क्षणेन तन्मे परिवर्ततेन्यथा ।
अतो विनिद्रे सहसा विलोचने

---

1. G.K.om. अये. N.N₂.P. om. किं नु खलु. G.N.N₂. om. अपि. P.B.इमां लताम्. K.om. इमां.

2. For पश्यतो मे रतिरुपलब्धा, G. K. have पश्यता रतिरुपलभ्यते मया. A.N.N₂.मनोरमेयं मम, and K.मनो रमते, for मनोरमा ममेयम्. B. मनोरमा ममैवेयं for मनोरमा ममेयम् । इयं हि.

4. N.N₂. °पल्लवमया.

6. A.B.P.आश्रिता, and N. श्रिता, for आस्थिता. A.N.B.मधुकृतां.

7. K.तन्वी for चण्डी. For अवधूय, G.K. read अवभीर्य. A.जातानुतापैव.

8. B.आलिङ्ग्य स्थितः for आलिङ्गति P.आलिङ्गते.

10. A.N.N₂.तदीयस्थानमाक्रम्य for तत्स्थान एव. B.P.तदीयं स्थानमाश्रित्य.

11. G.om.एव. N.N₂.अपि,for अये.— P.°सङ्गात्,andA.B. °संसर्गात्,for °संपर्कात्. N.N₂. °गात्रं संस्पृशादिव.

12. P.om. मे before शरीरं. G.शरीरं मे निर्वृत्तम्. N.N₂.K. हृदयम्, B. गात्रं, for शरीरं. G.K.om. तथापि. P.ins. मे before विश्वासः.

14. P.क्रमेण for क्षणेन. P.परिवृत्तम्.

15. B.P.ततो for अतो. A.N.N₂. विमुद्रे for विनिद्रे.

करोमि न स्पर्शविभावितप्रियः ॥ ३९ ॥

शनैश्चक्षुरुन्मील्य। कथं सत्यमेव प्रियतमा।

उर्व.। बाष्पं विसृज्य। जेदु जेदु महाराओ।

राजा।

त्वद्वियोगोद्भवे तन्वि मया तमसि मज्जता।
दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥ ४० ॥

उर्व.। अब्भन्तरकरणाए मए पच्चक्खीकिदवुत्तन्तो खु महाराओ।

राजा। अभ्यन्तरकरणयेति न खलु ते वचनार्थमवैमि।

उर्व.। कहइस्सं। इमं दाव पसीदद महाराओ जं मए कोववसं गदाए एदं अवत्थन्तरं पाविदो महाराओ।

१ जयतु जयतु महाराजः।—२ अभ्यन्तरकरणया मया प्रत्यक्षीकृतवृत्तान्तः खलु महाराजः।—३ कथयिष्यामि। एतत्तावत्प्रसीदतु महाराजो यन्मया कोपवशं गतयैतदवस्थान्तरं प्रापितो महाराजः।

1. B.स्पर्शनभावितप्रियः.

2. A.B.N.N2.शनैरुन्मीलयन् for शनैश्चक्षुरुन्मील्य. K.om.शनैः. B. सहर्षम् before कथं. For सत्यमेव, G.K. सैव मे. N.N2. om. कथं, and read त्वमेव प्रियतमा for सत्यमेव प्रियतमा. B.om. कथं. B. प्रिया.—P.शनैरुन्मीलयन्। कथं सत्यमेवोर्वशी.—K. इति मूर्छितः पतति after प्रियतमा.

3. A.प्रमृज्य, and P.उत्सृज्य, for विसृज्य. B.P.जेदु. G.जयदु जयदु. A.जअदु जअदु.

5. B. ins. कल्याणि न तावदहं प्रसादयितव्यः, and K.संज्ञां लब्ध्वा प्रिये, before त्वद् &c.—A.N.N2.P.त्वद्वियोगाद्भवे चण्डि. B.तद्वियोगोद्भवे चण्डी. K.त्वद्वियोगभवे.

6. N.N2.त्वमुप° for प्रत्युप°.

7. K.U.अन्तअरणए°. N.N2.°करणीए. N.°कदवुत्तन्तो. N.N2.B. K.om. खु. B.पच्चक्खउत्तन्तो महाराओ. K.G.अणवेक्खिदउत्तन्तो. P. पच्चक्खउत्तन्तो.

8. B.P.G.K.N.N2.°तरकरणाहमिति. U.अन्तःकरणमिति. We with A.—A.P. अवगच्छामि for अवैमि. K. reads the ते after अवैमि.

9. G.N.N2.कथयिस्सं. K.कधइस्सं. P.गहिस्सं. We read इमं with B. and Kâṭavema. The other Mss. omit it. A.K.पसीअदु. B. om. जं मए. A.N.N2.रोसवसं.

10. B.P.इमं for एदं. For पाविदो महाराओ, G. K. उववादिद महाराअस्स.

राजा । **कल्याणि न तावदहं प्रसादयितव्यः । त्वद्दर्शनादेव प्रसन्नबाह्यान्तःकरणोन्तरात्मा । कथय कथमियन्तं कालमवस्थिता मया विना भवती ।**

उर्व. । **सुणादु[1] महाराओ । भअवदा कुमारेण सासदं कुमारवदं गेण्हिअ अकलुसो णाम गन्धमादणकच्छो अज्झासिदो किदो अ एस विही ।**

राजा । **क इव ।**

उर्व. । **जो[2] इमं पदेसं इत्थिआ पविस्सदि सा लदाभावेण परिणमिस्स-**

---

१ शृणोतु महाराजः । भगवता कुमारेण शाश्वतं कुमारव्रतं गृहीत्वाकलुषो नाम गन्धमादनकच्छोऽध्यासितः कृतश्चैष विधिः ।—२ या एतं प्रदेशं स्त्री प्रवेक्ष्यति सा लताभावेन परिणंस्यति । गौरीचरणसं-

---

1-3. For कल्याणि G. K. have सुन्दरि. A.N.N_2.यत: before त्वद्दर्शनात्. B.N.N_2.P.om. एव. K.प्रसन्न: सबाह्यान्त:करणो ममान्तरात्मा. A.B. °बाह्याभ्यन्तर°. N. N_2. बाषाभ्यन्तर° (*sic*). A.N. N_2.B.मम before अन्तरात्मा. G. K. insert तत् before कथय. The order is different in N. N_2.कथय कथं मया विना भवतीयन्तं कालं स्थिता. A.कथय कथमियन्तं कालं मया विना भवती स्थिता. B. मया विना स्थितासि for अवस्थिता मया विना भवती. P.कथमियन्तं कालं मया विना स्थितासि.

4-6. G.सुणोदु. K.ins पुरा before भअवदा. A.N.N_2.B.महासेणेण for कुमारेण. G.सअं for सासदं. K. सासअं. B.सास्सदं. N.N_2.कुमारव्वदं.—B.P.गण्हिअ. G.B.अकलसो. K.अकुलुसो. G. and K. somewhat desirably insert अअं the former before गन्ध° and the latter before अकलुसो. But the other Mss. omit it. N.N_2. °मादणप्पदेसो. P. °मादणअच्छो. B.किदा. B.om. अ. K.च for अ. G.K.P.एसो.

7. B.कथमिव. P.किमिति.

8. G.अत्थिआ. N.N_2.जा इत्थिआ इमं पदेसं पविसदि सा &c. A.पविसिहिस्सदि, and G.K.अक्कमिस्सदि, for पविस्सदि. B.P.परिणमिस्सदित्ति गोलीचलणरागसंगमणीअं मणिनिमित्तं विणा तदो ण मुञ्चिस्सदित्ति । गुरुसावसंमूढहिअआ अहं देवदासमअं

दि । गोरीचरणसंभवं मणिं विणा तदो ण मुच्चिस्सदित्ति । साहं गुरुसावसंमूढहिअआ देवदासमअं विसुमरिअ अगिहीदाणुणआ कुमारवणं पविठ्ठा । पवेसाणन्तरं एव्व वासन्ती लदा संवुत्ता ।

राजा । सर्वमुपपन्नम् ।

रतिखेदसुप्तमपि मां
शयने या मन्यसे प्रवासगतम् ।
सा त्वं प्रिये सहेथाः
कथं मदीयं चिरवियोगम् ॥ ४१ ॥

इदं तद्यथाकथितं त्वत्संगमनिमित्तं मुनेरुपलभ्य मणिप्रभावादासादिता त्वमस्माभिः । मणिं दर्शयति ।

भवं मणिं विना ततो न मोक्ष्यत इति । साहं गुरुशापसंमूढहृदया देवतासमयं विस्मृत्य अगृहीतानुनया कुमारवनं प्रविष्टा । प्रवेशानन्तरमेव वासन्ती लता संवृत्ता ।

आआरं विसुमरिअ अकिदाणुणआ कुमारवणं पविठ्ठा । पवेसाणन्तरं एव्व वासन्ती लदा संवुत्ता. P.परिणमिस्सदित्ति गोरीचरणसंभवमणिणिमित्तं विणा ण मुच्चिस्सदित्ति गुरुसावमूढहिअआ अहं देवदासमअं विसुमरिअ अग्गहिदाणुणआ कुमारवणं पविठ्ठा । पवेसाणन्तरं वासन्दिआ संउत्ता ।

1. A.°चरणभवं. A. ins. अ after विणा. K.°संभवमणिं. A.मुच्चिस्सिदित्ति. N.K.मुञ्चिस्सदित्ति, and N2. मुचि°. A.N.N2.तं एव्व अहं for साहं. B. om. साहं.

2. A.N.N2.°मूढ° for °संमूढ°. N.N2.देवसावं विसुमरिअ अगहिदाणुणआ &c. G.K.विसुमरिदम्हि. A. अगहिदाणुणआ.

3. K.कुमाळवणं. A.N.N2.पविठ्ठा हि. N.N2. om. एव्व. A.N.N2.वासंती लद[N.N2.दा]म्हि संवुत्ता. K.जेव्व लदह्मि संवुत्ता. G.एव्व लदाभावेण मदा[*sic*] संवुत्ता.

4. K.ins.प्रिये before सर्वम्.

6. G.*deest* : या मन्यसे up to चिर° in the fourth pâda.

7-8. B.P.अबले for प्रिये.K. सा त्वमिहैतदवस्थं कथं सहेथाश्चिरवियोगम्.

9. G.K.om. इदं. N.N2.यथा° for तद्यथा°. P.तावत् for तत्. A.N.N2.°समागम° for °संगम°. A.P.उपलब्धम् for उपलभ्य, and N.N2.मणिरुपलब्धं for मुनेरुपलभ्य. K.पुनः for मुनेः. B.उपलब्धो मणिरयम् । मणिप्रभावात् &c.

10. A.N.N2.उपलब्धा for आसादिता. B.P.अस्माभिरिति, and B. om.

उर्व. । [1]अम्मो संगमणीओ । अदो खु महाराएण आलिङ्गिदमेत्त एव्व पकिदत्थम्हि संवुत्ता । मणिमादाय मूर्ध्नि वहति ।

राजा । एवमेव सुन्दरि क्षणमात्रं स्थीयताम् ।

स्फुरता विच्छुरितमिदं
रागेण मणेर्ललाटनिहितस्य ।
श्रियमुद्वहति मुखं ते
बालातपरक्तकमलस्य ॥ ४२ ॥

उर्व. । [2]महन्तो खु कालो तुह पइट्ठाणादो णिग्गदस्स । असुअन्ति मं पकिदिओ । ता एहि णिवुत्तम्ह ।

राजा । यदाज्ञापयति भवती ।

---

१ अहो संगमनीयः । अतः खलु महाराजेनालिङ्गितमात्रैव प्रकृतिस्थास्मि संवृत्ता ।— २ महान्खलु कालस्तव प्रतिष्ठानान्निर्गतस्य । असूयन्ति मह्यं प्रकृतयः । तदेहि निवर्तावहे ।

---

the stage-direction.

1. N.N2.P.अम्हो for अम्मो. B. अंहे. P. °गमणीयो. K. °गिदमेत्ता.
2. A.पयदित्थिम्हि. G.परिकिदत्थह्मि. P.पकिदथ्थम्हि संउत्ता. N.N2.पअदित्थह्मि. B.किदथ्थम्मि. K.एव्व पकिदिं आवणम्हि । राजा । ललाटे मणिं निवेश्य । स्फुरता &c.—A.P. वन्दते, and N.N2.वन्दे for मूर्ध्नि वहति. B.इति मणिमादाय वन्दते.
3. G.सुन्दरि precedes एवमेव.
4. A.ततः and N.N2.यतः before the stanza.
8. A.महाराअ, N.N2.महाराओ, and K.पिअंवद, before महन्तो.—G. inserts गदो after कालो. G.तव for तुह. K.अम्हाणं. B.पडिट्ठाणादो. K. णिग्गदाणं. P.असूअअन्ति. N.N2. असूइअस्सन्ति. B.ता असूअइस्सन्ति. A.असूइस्सन्ति. A.N.N2. om. मं. K.कदाइ असूअन्ति पइदिओ अह्म ता एहि गच्छम्ह.
9. A.पक्किदीओ. B.पकिदओ. K.पइदिओ. N.N2.पकीदीओ. A.णिअत्तेमो. N.N2. णिअत्तिम्हो. G. णिओत्तम्ह. P.एहि णिव्वुत्तम्ह for ता एहि &c.
10. K.आह for आज्ञापयति. B. om. भवती. K. ins. इत्युत्तिष्ठतः after भवती.

उर्व. । कहं महाराओ गन्तुमिच्छदि ।

राजा ।

अचिरप्रभाविलसितैः पताकिना
सुरकार्मुकाभिनवचित्रशोभिना ।
गमितेन खेलगमने विमानतां
नय मां नवेन वसतिं पयोमुचा ॥ ७३ ॥

[इति निष्क्रान्ताः सर्वे ।

। विक्रमोर्वशीये चतुर्थोऽङ्कः समाप्तः ॥

---

१ कथं महाराजो गन्तुमिच्छति ।

---

1. A.N.N_2. om. ता bef. कहं. A. N_2.कधं. K.अत्र कधं उण. B.गन्तुं इच्छइ. P.K.गन्दुं.

3. A. °विलसितात्. N.N_2.B. °विलसितोल्पताकिना.

4. A.N.N_2.हरि° for सुर°.

5. K.गमनेन for गमितेन.

6. For नवेन, G. reads घनेन. K.जवेन.

7. B.इति परिक्रम्य निष्क्रान्ता.

| ततः प्रविशति परितुष्टो विदूषकः |

विदूषकः | [1]दिट्ठिआ चिरस्स कालस्स उव्वसीसहाओ णन्दणवणप्पमुहेसु देवदारण्णेसु विहरिअ पडिणिवुत्तो पिअवअस्सो | दाणिं ससक्कारोवआरेहिं पकिदीहिं अणुरज्जन्तो रज्जं करेदि | असंताणत्तणं वज्जिअ ण किंवि से हीणं | अज्ज तिहिविसेसोत्ति

१ दिष्ट्या चिरस्य कालस्योर्वशीसहायो नन्दनवनप्रमुखेषु देवतारण्येषु विहृत्य प्रतिनिवृत्तः प्रियवयस्यः | इदानीं ससत्कारोपचारैः प्रकृतिभिरनुरज्यमानो राज्यं करोति | असंतानत्वं वर्जयित्वा न किमप्यस्य हीनम् | अद्य तिथिविशेष इति भगवत्योर्गङ्गायमुनयोः संगमे देवीभिः

1. U.परिहट्ठो. K.हट्ठो.
2. U.हीही भो: before दिट्ठिआ for which it reads दिट्ठिआ. K. too ins. हीही भो: bef. दिट्ठिआ. P.चिरकालस्स. N.N_2. For "णन्दण° &c. up to करेदि," सङ्कणं रजन्तो रज्जं करिस्सदि. P.उव्वसीसहिदो. G. inserts तत्तभवं, U.तत्थभवं राआ, and K.तत्तभवं राआ, after °सहाओ.
3. A.देवारण्णेसु. G.देवदारेसु. U.णन्दवअणमुहेसु प्पदेसेसु for णन्दणवणप्पमुहेसु देवदारण्णेसु. P.णन्दणप्पमुहेसु. K.पदेसेसु. G.U.K. om. पिअवअस्सो. P. om. पिअ°. U. प्पडि°. U.पविसिअ अत्तणो णअरं after पडिणिवुत्तो.
4. A.सकज्जानुसारेण, B.सो कज्जाणुसारिणीहिं, and P.किदसक्काराहिं, for ससक्कारोवआरेहिं. A.पकिदि अणुरज्जन्तो रज्जं करिस्सदि. P.रञ्जिदो रज्जं करेदि. U.स्सकज्जाणुसासणेण प्पइदिमण्डलं for ससक्कारोवआरेहिं पकिदीहिं. K.पविसिअ णअरं सकज्जाणुसासणेण पइदिमण्डलं अणु° &c. for दाणिं up to अणु°. B.अणुरज्जमाणो.
5. U.भो before असंताण°. A. असंताणदं. N.N_2.असंताणअं. P. असंताणं. K.संताणअं. U.से ण किं-

भअवदीणं गङ्गाजमुणाणं संगमे देवीहिं सह किदाहिसेओ संपदं उवआरिअं पविट्ठो । ता जाव तत्तभवदो अलंकरिअमाणस्स अणुलेवणमल्ले अग्गभागी होमि । इति परिक्रामति ।

नेपथ्ये । हद्धी हद्धी दुऊलत्तरच्छदे तालवण्टाधारे णिक्खिविअ

सह कृताभिषेकः सांप्रतमुपकार्यां प्रविष्टः । तद्यावत्तत्रभवतोलंक्रियमाणस्यानुलेपनमाल्येग्रभागी भवामि ।

१ हा धिक् हा धिक् दुकूलोत्तरच्छदे तालवृन्ताधारे निक्षिप्य

वि सोभणीअं for ण किंवि से हीणं. N.N2.वड्डिअ मण्णे किंवि से ओहीणं. B.वअणिअं for हीणं. P.वअणिज्जं णत्थि for ण किंवि से हीणं. K.से ण किंपि सोअणीअं for ditto. A.U.K.तिवि°.

1. N.N2.K.भवदीणं. N.N2.गङ्गायमुणाणं. A.G. have °जउणाणं. U. N.N2.संगमं. K.N.N2. देवीए for देवीहिं. U. किदभिसेओ. B. P. K. किदाभि°. N.N2.कदाहिसेसो.

2. N.N2.संवदं. B.उपकरिअं. G.om. उवआरिअं and has अलंकरिदुं instead. B.पविट्ठो. G.B.P. om. ता. U.K. om. तत्तभवदो. B.P.तत्तहोदो. For अलंकरिअमाणस्स &c. N. and N2. have पसाहिअमाणस्स अणुलेवणमते[miswritten for ल्ले ?] अग्गदो भवीअ अणन्तरं होमि | परिक्रामति. A. N. N2. पसाधियमाणस्स for अलंकरिअमाणस्स.

3. For अणुलेवणमल्ले G. reads अङ्गागुलेवणप्पदादेण मल्लेसु. We with A.N.N2. and Kâṭavema who reads अणुलेवणे मल्लेसु अ.—U.K. °लेवणमल्लभाइभादुत्त[K. भादुत]रो for °लेवणमल्ले अग्गभागी. B.अणुलेवणे and a lacuna instead of मल्ले and goes on अग्गहोई अहं अणन्तरो होमि. P.अणुलेवणमल्लेवि अग्गभाई अणन्तरो होम्मि. A.अग्गभाई अणन्तरो होमि. U. om. the stage-direction इति &c.

4. N.N2. give the speech thus एसो खु लोओत्तरकदतालवेंट-[*sic* लवेंट?]विहाणे णिक्खिविअ णीअमाणो अच्चराविलासवदीए मोलिरअणो मणी इदो आमिससङ्किणा गिद्धेण अक्खित्तो. B.हद्धि २ दुऊलुत्तरच्छदेकलधोदभाअणे णिक्खिविअ आणीअमाणो उव्वसीविलासोजिताए मोलिरअणाए पआ[ओ?]जिदो मणि आमिससङ्किणा गिद्धेण अक्खित्तो. K.हद्धी हद्धी एस तालवेण्टपिआणं णिक्खिविअ णीअमाणो अच्छराविरहिदेण मउलिरअणदाए पओइदो मणी आमिससङ्किणा गिद्धेण आक्खित्तो. P. हद्धि हद्धि दुऊलोत्तरच्छदे तालउन्तविआणे भाअणे णिक्खिअ णिअमा-

णीअमाणो मए भट्टिणो अब्भन्तरविलासिणीमोलिरअणजोग्गो मणी आमिससङ्किणा गिध्धेण आखित्तो ।

विदू. । कर्णे दत्त्वा । **अच्चाहिदं । परं बहुमदो क्खु सो वअस्सस्स संगमणीओ णाम चूडामणी । अदो खु असमत्तणेवथ्थो तत्तभवं आसणादो उठ्ठिअ इदो एव्व आअच्छदि । जाव णं उवसप्पामि ।**

नीयमानो मया भर्तुरभ्यन्तरविलासिनीमौलिरत्नयोग्यो मणिरामिषशङ्किना गृध्रेणाक्षिप्तः ।

१ अत्याहितम् । परं बहुमतः खलु स वयस्यस्य संगमनीयो नाम चूडामणिः । अतः खल्वसमाप्तनेपथ्यस्तत्रभवानासनादुत्थाय इत एवागच्छति । यावदेनमुपसर्पामि ।

णो अच्छराविलासपरिइदामौलीरअणाए पओजइदव्वो मणि आमिससङ्किणा गिध्धेण आखित्तो. B.हाध्धि २. A.N.N_2. insert एसो before दुऊल° &c. A.दुऊलोत्तर°. G. दुऊलत्तरच्छिदे. A. तालवेण्टविहाणे. G.तालयन्ताधारे. After णिक्खिविअ, A. goes on: णीअमाणो अच्छराविलासवदीए मोलिरअणाए उइदो मणी आमिससङ्किणा गिद्धेण अक्खित्तो. U. reads the passage from हध्धी &c. thus: हद्धी हद्धी एसो तालवेन्तविआणं णिक्खिविअ णीअमाणो मुउलिदलोअणदाए ण पओइदो मणी आमिससङ्किणा गिद्धेण आक्खित्तो. G. °रिअण° for °रअण° and अभिक्खित्तो for आक्खित्तो.

3. U.K.आकर्ण्य for कर्णे दत्त्वा and read अच्चाहिदं twice. B.reads हु अच्चाहिदं अच्चाहिदं. P. स्वगतम् after दत्त्वा, and goes on अच्चाहिदं परं बहुमदो सो वअस्सस्स संगमणिअणामहेओ मणी | अदो &c. A.N.N_2. अविहा २ after दत्त्वा. A.N.N_2. बहुमदो, G.परमाहिमदो, and U.K.परमबहुमदो, for परं बहुमदो. U. क्खु. B.om. खु. N.N_2. पिअवअस्सस्स. G. and B. संगमणीअणामधेओ. B.संगमणीअणामहेयो.

4. A.N.N_2.P. om. चूडा°. B. चूलामणि. U.क्खु. G. inserts अअं after खु. G. °णेवत्सो. B. असमात्तणेवच्छो एव्व अत्तभवं. K. °णेवत्थो जेव्व. P. °णेवच्छो. U.जेव्व भवं, and P.वअसो, for तत्तभवं.

5. U. आसणदो. N.N_2.आसणाओ. G.om.उट्ठिअ. P. उट्ठिदो. U. simply उत्थिदो for इदो एव्व आअच्छदि. So K. आसणादो उत्थिदो ता पासपरिवत्ती होमि. N.N_2. om. एव्व. U.ता पासपज्जिवत्ती होमि for जाव णं.

। ततः प्रविशति सावेगपरिजनो राजा ।

राजा ।

आत्मनो वधमाहर्ता क्वासौ विहगतस्करः ।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ॥ १ ॥

किराती । ऐसो एसो खु मुहकोडिलग्गहेमसुत्तेण मणिणा आलिहन्तो विअ आआसं पडिब्भमदि ।

राजा । पश्याम्येनम् ।

असौ मुखालम्बितहेमसूत्रं
बिभ्रन्मणिं मण्डलचारशीघ्रः ।
अलातचक्रप्रतिमं विहंगस्
तद्रागरेखावलयं तनोति ॥ २ ॥

किं नु खलु कर्तव्यम् ।

---

१ एष एष खलु मुखकोटिलग्नहेमसूत्रेण मणिना आलिखन्निवाकाशं परिभ्रमति ।

उवसप्पामि. B. आअच्छइ. A.P.उपसप्पामि. After उवसप्पामि G. goes on : राजा । प्रविश्य सावेगं परिजनमवलोक्य । रे रे रैवतक रैवतक आत्मनो &c. U.K. after the end of Vidûshaka's speech : इति निःक्रान्तः प्रवेशकः । ततः प्रविशति राजा विदूषकश्च कञ्चुकिरैवतकौ-[K. °रैवतकौ] परिजनश्च । राजा । रैवतक [K.परिजनं विलोक्य रैवतक] आत्मनो वधम् &c. But A.N.N2. B. P. and G. agree in giving no stage-direction indicating that there is the end of a *praves'aka* here.

3. For वधमाहर्ता G. has वधको हर्ता.

5-6. For किराती G.K.U. read किरातः. A.N.N2.om.एसो एसो खु. U.K.P. om. one एसो and B. om. खु. U.मुहग्गकोडि°. B.अग्गमुहकोडि°. K.om. मणिणा. N.N2. आलिहन्तो. N.N2. परिब्भमदि. U. संभमदि. K संभमइ. G.अणुलिम्पन्तो आसाबारिं भमइ for आलिहन्तो विअ आआसं पडिब्भमदि. B.परिब्भमइ. U.K. अणुरञ्जअन्तो for आलिहन्तो.

7. G. पश्यामः.

9-11. B.P. °चारु शीघ्रम्. G. मण्डलचारुशीघ्रः. U.K.मण्डलशीघ्रचारः. N.N2.आलात°. P.करोति for तनोति.

12. For किं, G. B. and P.कथं. P.om. खलु.

विदू. । उपेत्य । [१]अलं एत्थ घिणाए । अवराही सासणीओ ।

राजा । सम्यगाह भवान् । धनुर्धनुस्तावत् ।

[निष्क्रान्ता धनुर्ग्राहिणी यवनी ।

राजा । वयस्य न दृश्यते विहंगः ।

विदू. । [२]इदो दक्खिणन्तेण अवगदो सासणीओ कुणपभोअणो ।

राजा । परिवृत्यावलोक्य । दृष्ट इदानीम् ।

प्रभापल्लवितेनासौ करोति मणिना खगः ।
अशोकस्तबकेनेव दिङ्मुखस्यावतंसकम् ॥ ३ ॥

---

१ अलमत्र घृणया । अपराधी शासनीयः ।—२ इतो दक्षिणान्तेनापगतः शासनीयः कुणपभोजनः ।

---

1. G.हिंसाघिणाए. B.हिंसासङ्काए. B. ins.एसो bef. सासणीओ. P.अहिंसाघिणाए एसो अवराही सासणिज्जो. A.N.N_2. read उपेत्य विदूषकः, and A. reads the speech thus: किं एत्थ चिन्तणीअं णं सो अवराही सासणीओ. N.N_2.किं णु एत्थ चिन्तणीअं अवराधी एसो सासणीओ. U.K.om. उपेत्य and have भो अलं एत्थ घिणाए । अवराधी[K. ही] सासणीओ.

2. G.सम्यग्भवानाह. A.N.N_2. om. तावत्. B.K.P. do not repeat धनुः.

3. A.B.P.यवनी[P.°निका] । एसा आणइस्सं । निष्क्रान्ता. N.N_2.जवनी । एसा अणइस्सं । निष्क्रान्ता । B.परिजनः । जं भट्टा आणवेदित्ति निष्क्रान्तः.

4. A.N.N_2.B. om. वयस्य and read the rest of the speech thus: न दृश्यते क्व नु खलु [B.स्यात्] गत इति [B.om. गत इति]. U. altogether omits the speech वयस्य &c. K. राजा । दृश्यते विहगाधमः. P.न दृश्यते क्व नु खलु.

5. A.inserts भो before इदो, and सो before सासणीओ. N.N_2. corruptly सो सउणीओ कुणपभोअणो for सासणीओ कुणपभोअणो. U. इदो दक्खिणन्तरे चलिदो सउणीहदासो. B.om. इदो. K.दक्खिणतरो [दक्खिणन्तरो ?] चलिदो सउणिहदासो. P.om.सासणीओ. G.इदो इदो दक्खिणेण अअं सासणीओ सउणहदओ.

6. A.N_2.विलोक्य. G.N.N_2.B. दृष्टमिदानीम्. P. om. अवलोक्य च. U.K.om. the stage-direction and om. दृष्टम्, simply reading दृष्टो bef. इदानीम्.

7. A.N.N_2.B.P.विभाति for करोति.

8. G.दिग्मुखस्य. A.N.N_2.B.P.

प्रविश्य चापहस्ता यवनी ।

यवनी । भट्टा[1] एदं हथ्थावावसहिदं सरासणं ।

राजा । किमिदानीं धनुषा । बाणपथमतीतः क्रव्यभोजनः । तथा हि

आभाति मणिविशेषो
दूरमिदानीं पतत्रिणा नीतः ।
नक्तमिव लोहिताङ्गः
परुषघनच्छेदसंयुक्तः ॥ ४ ॥

कञ्चुकिनं विलोक्य । लातव्य मद्वचनादुच्यतां नागरिकः सायं निवासवृक्षाश्रयी विचीयतां विहगदस्युरिति ।

कञ्चु.। यदाज्ञापयति देवः ।

[इति निष्क्रान्तः ।

विदू. । उवविसदु[2] भवं संपदं । कहिं गदो रअणकुम्भीलओ भवदो सासणादो मुच्चिस्सदि ।

---

१ भर्तः एतद्धस्तावापसहितं शरासनम् ।—२ उपविशतु भवान्

अवतंसकः. U.अनुर्ग्रहणोचिता for अनुग्राहिणी.

1. U.K.धनुर्ग्रहस्ता for चापहस्ता. A.B.P.यवनिका. N.N2.जवनिका.

2. B.भट्ट. P.भट्ट. B.P.हथ्थावाप°. G.B.P.इदं.—U.ससरं चावं for हथ्था°&c. K.ससरं सरासणं for ditto.

3. For धनुषा A.N.N2. read शरासनेन which appears to be an improvement upon the original reading. A.B.P.अतिक्रान्तः कुणपाशनः, and N.N2. अतिक्रान्तोयं कुणपाशः, for अतीतः क्रव्यभोजनः.

6–7. U.लोहिताङ्गपरुषघन°. A.N.N2.°संवीतः for °संयुक्तः.

8-9. B.P.काञ्चुकीयम्. U.अवलोक्य. G.K.U. insert आर्य before लातव्य. U. after लातव्य, inserts कंचु. । आज्ञापयतु देवः । राजा.— G.U.उच्यतां नागरिकाः (*sic*). B. आज्ञाप्यतां नागरिकः. K.उच्यन्तां नागरिकाः. N.N2.°वृक्षाश्रयी. U.सायं निवासवृक्षे विचीयतां विहंगाधमः. G. K. सोयं for सायं. G.विहगतस्करो यत्र विहगाः स्फुरन्ति. N.N2.विचीयन्ताम् (?) for विचीयताम्. G.चीयताम्. K.विहगतस्करः, omitting इति.

10. B.P.काञ्चुकीयः.

12-13. N.N2. read the speech thus: ओवविसदु भवं । कहिं गदो अअं कुम्भीलओ तव सासणादो मुच्चिस्स-

राजा । विदूषकेण सहोपविश्य ।

रत्नमिति न मम तस्मिन्
मणौ प्रियत्वं विहंगमाक्षिप्ते ।
प्रियया येनास्मि सखे
संगमनीयेन संगमितः ॥ ५ ॥

विदू. । णं परिगदत्थोम्हि किदो भवदा ।

ततः प्रविशति सशरं मणिमादाय कञ्चुकी ।

कञ्चु. । जयतु जयतु देवः ।
अनेन निर्भिन्नतनुः स वध्यो

सांप्रतम् । क्व गतो रत्नकुम्भीरको भवतः शासनान्मोक्ष्यते ।

१ ननु परिगतार्थोऽस्मि कृतो भवता ।

दित्ति. B.P.उपविसदु. B.P.om.संपदं. B. ins. वि after कहिं and B.U. ins. ण bef. मोक्ष्यते. We omit वि with G.K.U.A.N.N₂. P., and ण with G.K.U.A.N. N₂.—B.तुह सासणं for भवदो सासणादो. P.तुह, and A. तव, for भवदो.—U.भो वीसमीअदु भवं संपदं. G. K.रय[K.अ]णकुम्भीलो.—U.तदो सो for गदो. P.सो before गदो. A. मुञ्चिस्सीदित्ति. K.मुञ्चिस्सदित्ति. U. विमुञ्चिस्सदि, and adds इत्युपविशतः, omitting the stage-direction in the following speech.

1. A.N.N₂.तथास्तु before विदूषकेण सह &c. N.N₂.U.वयस्य after उपविश्य.

2. A.N.N₂. मे न तस्मिन्, and U.K.P.न मे तस्मिन् for न मम तस्मिन्. G.न ममतास्मिन्.

3. B.स्पृहासीत्, and G.K.U. प्रयत्नः, for प्रियत्वं which we read with P.A.N.N₂.—G.विहंगमे क्षिप्ते. N.N₂. विहंगमाकृष्टे. U.K.विहंगमोत्क्षिप्ते.

4. G.K.U.तेन for येन. We read येन with A.N.N₂.B.P.

6. A.कदो. B.होदा. N.N₂. परिगओम्हि किदो. G.K.परिगदत्थो किदो. U.om. the speech of Vidûshaka altogether (णं &c.)

7. G.K.प्रविष्टः. U.has simply प्रविश्य for the whole stage-direction. B.काञ्चुकीयः. P.काञ्चुकीयः किराती च. B.उपसृत्य काञ्चु. P.काञ्चु° । जयति महाराजः.

8. U.जयति जयति. B.जयतु not repeated. A.N.N₂.उपसृत्य । देव after देवः.

9. B.P.°वपुः for तनुः. P.B.निर्भिण्ण°.

बलेन ते मार्गणतां गतेन ।
प्राप्योपकार्यान्तरमन्तरिक्षात्
समौलिरत्नः पतितः पतत्री ॥ ६ ॥

सर्वे विस्मयं रूपयन्ति ।

कञ्चु. । अद्भिः प्रक्षालितो मणिः कस्मै प्रदीयताम् ।

राजा । किराति अग्निशुद्धमेनं कृत्वा पेटकं प्रवेशय ।

किराती । [1]जं भट्टा आणवेदि । इति मणिं गृहीत्वा निष्क्रान्ता ।

राजा । लातव्य अपि जानीते भवान् कस्यायं बाण इति ।

कञ्चु. । नामाङ्कितो दृश्यते न तु मे वर्णविचारक्षमा दृष्टिः ।

राजा । तेन ह्युपनय शरम् ।

---

१ यद्भर्ता आज्ञापयति ।

---

1. N.N_2.तन्मार्गणताम्. U.K.रोषेण, and P.B.बाणेन, for बलेन.
2. For उपकार्यान्तरम् G.K.U.and Kâṭavema have अपराध्रोचितम्.
5. A.कस्मिन्नु, and N.N_2.कस्मिन्, for कस्मै. U.मणिरद्भिरयं प्रक्षालितः कस्मै प्रदीयताम्, meaning it to be the first half of an anushṭup (see *infrâ*). B.प्रदीयते. P.K.दीयताम्.
6. K.G.किरात for किराति. B. om. किराति and reads अग्निशुद्धं कृत्वा कोशपेटं प्रवेशय. P.om. किराति and has अग्निविशुद्धिं कृत्वा कोशगृहं प्रापय. A.अग्निशुद्धिं for अग्निशुद्धमेनम्. N.N_2 कृत्वा for एनम्. U.गच्छ रेचक कोषस्य पेटके स्थाप्यतामयम् । ७ ॥ the second half (see *suprâ*). A.कोशपेटाम्. N.N_2.कोशपेटिम् for पेटकम्.
7. U.K.किरातः. G.K.B.देवी for भट्टा. U.आदाय निष्क्रान्तः. P. B. om.मणिं गृहीत्वा. K.इति परिगृह्णाति for the whole stage-direction.
8. U.लातव्यं प्रति for लातव्यः. B, om. लातव्य. P. reads लातव्य after अपि. U.अथ for अपि. U. शरः for बाणः.
9. U.नात्र मे वर्णविभागसहा दृष्टिः for न तु &c. B.P.नामाक्षराणि दृश्यन्ते न मे वर्ण[P.om.]विभागक्षमा दृष्टिः. A.विवेचनविभागक्षमा, and N.N_2. वर्णविभागक्षमा, for वर्णविचारक्षमा. G.om. मे.
10. G. om. this and the first line on the next page. U तदुपश्लेषय शरं यावन्निरूपयामि for तेन ह्युपनय शरम् and omits the following three speeches

कञ्चु. । तथा करोति ।

राजा । नामाक्षराण्यनुवाच्य । सापत्यतां रूपयति ।

कञ्चु. । यावन्नियोगमशून्यं करोमि ।

[इति निष्क्रान्तः ।

विदू. । [1]किं भवं विआरेदि ।

राजा । शृणु तावत्प्रहर्तुर्नामाक्षराणि । वाचयति ।

उर्वशीसंभवस्यायमैलसूनोर्धनुर्भृतः ।
कुमारस्यायुषो बाणः प्रहर्तुर्द्विषदायुषाम् ॥ ७ ॥

विदू. । सपरितोषम् । [2]दिठ्ठिआ संताणेण वड्ढदि भवं ।

राजा । सखे कथमेतत् । अन्यत्र नैमिषेयसत्त्रादवियुक्तोहमुर्वश्या । न च मया गर्भव्यक्तिरालक्षिता । कुत एव प्रसूतिः । किं तु

---

१ किं भवान्विचारयति ।—२ दिष्ट्या संतानेन वर्धते भवान् ।

---

ending with निष्क्रान्तः. B.तद्युपक्षेपय तं शरं । कां. । यथोक्तं करोति. K. उपनय शरं । कं. । यथादिष्टं करोति. P. उपक्षेपय शरम् । कां. । यथोक्तं करोति.

2. B.P.वाच्य for अनुवाच्य. P.ins. आत्मनः before सापत्यताम्.

5. A.विसारेदि. K.विचारेदि.

6. N.N2.संहर्तुः U.नामाक्षराणि प्रहर्तुः. P. reads the speech thus: श्रूयताम् । नामाक्षराणि वाचयति. G. K. om. वाचयति. U. inserts before वाचयति as follows: विदूषकः । भवाहिदोम्हि । राजा ।

7. For °संभवस्य G.K. have °तनयस्य. U.अनुष्मतः

8. For द्विषदायुषाम् G.and K. read द्विषदायुषः. U.संहर्ता विद्विषायुषाम्.

9. U. om.सपरितोषम्. G.दिट्ठिआ. B.U.दिठ्ठिआ. P.संदाणेण. G.वद्ददि. U.वड्ढ[ड्ढ?]दि. N.N2. वड्ढदु. B. भवं वड्ढइ. P.भवं वड्ढइ.

10-11.G.K. read the word सखे after कथमेतत्. U.कथमिवैतत्. N. N2.एवम् for एतत्.—A.N.N2.B. नैमिषीयात्सत्त्रात्. K. नैमिषेयसत्त्रात्. P.नैमिषेयात्सत्त्रात्. U. सखे (then after a *lacuna*) ऋतुदर्शनादवियुक्तोहमुर्वश्या न कदाचिदपि तत्र गर्भाविर्भूतदोहदाप्युपलक्षिता. A.N.N2. ins. अस्याः after मया.—A.N. N2.B.गर्भव्यतिकरो लक्षितः. P.om. न च मया गर्भव्यक्तिरालक्षिता. G.K. एषा for एव.

आविलपयोधराग्रं
लवलीदलपाण्डुराननच्छायम् ।
कानि दिनानि वपुरभूत्
केवलमलसेक्षणं तस्याः ॥ ८ ॥

विदू. । मा भवं सव्वं माणुसीधम्मं दिव्वासु संभावेदु । पहावणिगूढाइं ताणं चरिदाइं ।

राजा । अस्तु तावदेवं यथा भवानाह । पुत्रसंवरणे किमिव कारणं तत्रभवत्याः ।

---

१ मा भवान्सर्वं मानुषीधर्मं दिव्यासु संभावयतु । प्रभावनिगूढानि तासां चरितानि ।

---

1. U.आनीलचूचुकाग्रम्.
2. G.K.लवलीफल°. A.°पाण्डुराननं कायम्. P.°पाण्डरा°.
3-4. P.B.A.N.N2. read the 3rd and 4th Pâdas thus: [B.P. कानि] तानि दिनानि वपुरभूत् केवलमलसेक्षणं तस्याः. U.कानिचिदहानि शरीरं केवलमलसेक्षणं तस्याः. K. कानिचिदहानि वपुरभूत् (!) केवलमलसेक्षणं तस्याः. G. कानिचिदहानि जातं शरीरमलसेक्षणं तस्याः, an easy but unsupported reading. We read कानि with B. P. and with Kâṭavema, who, however, comments upon कानिचित्. I do not see how he accommodates the चित्. Here is his explanation. आविलपयोधराग्रमित्यादि । तस्या वपुः शरीरं कानिचिद्दिनानि कतिपयानि दिवसानि । केवलमाविलपयोधराग्रं कलुषचूचुकं लवलीदलपाण्डुराननच्छायं । लवली लताविशेषः तस्य दलवत्पाण्डुराननच्छाया मुखकान्तिः यस्य तत् तथोक्तम् अलसेक्षणं चाभूत्.
5-6. A.N.N2. om. भवं and have खु after मा. U. om. सव्वं. B.मा एव्वं माणुसीधम्मं दिव्वासु संभाविआदि. P.मा एव्वं सव्वं माणुसधम्मं दिव्वासु ण संभावेहि. U.दिव्वाए. A.N.N2. संभावेहि.—A. पहावगूढाणि ताणं चरिदाणि. G.पभाव°. N.N2. पहावगूढाणि ताणं चरिआणि. U.पभावगूढाइं देवचरिआइं. K.°निगूढाइं. B.आसं for ताणं. P.आसां.
7. P. om. अस्तु तावदेवम्. N.N2. एवाह भवान् for यथा भवानाह. N. N2.किमिति for किमिव. P.om.इव.
8. U.तस्याः for तत्रभवत्याः. N.N2. P.B.U.K. add two more

विदू. । [१]को देवदारहस्साइं तक्कइस्सदि ।

प्रविश्य कञ्चुकी ।

कञ्चु. । जयतु जयतु देवः । देव च्यवनाश्रमात्कुमारं गृहीत्वा तापसी संप्राप्ता देवं द्रष्टुमिच्छति ।

राजा । उभयमप्यविलम्बितं प्रवेशय ।

कञ्चु. । यदाज्ञापयति देवः ।

इति निष्क्रम्य चापहस्तेन कुमारेण तापस्या च सह प्रविष्टः ।

कञ्चु. । इत इतो भवती । सर्वे परिक्रामन्ति ।

विदू. । विलोक्य । [२]किं ण खु सो एसो तत्तभवं खत्तिअकुमारओ जस्स

---

१ को देवतारहस्यानि तर्कयिष्यति ।—२ किं न खलु स एष

---

speeches after तत्रभवत्याः, thus:-
विदू. । किं भण्णं । महाराओ परिहरिस्सदित्ति ।
राजा । कृतं परिहासेन । विचिन्त्यताम् [N.N2.K.चिन्त्यताम् । U. ins. वयस्य bef. विचिन्त्यताम्.]

The first of these speeches is read by U.K. thus :
विदू. । मा बुद्धिं मं राआ परिहरिस्सदित्ति ।

and by B. thus :
विदू. । अत्ताणं महाराओ परिभविस्सदित्ति ।

But A. G. and Kâṭavema omit them.

1. A.N.N2. ins. णाम, and B. णु खु, after को. A.N.N2.B. °रहस्साणि. U.K. तक्किस्सदि.

2. G.ततः प्रविश्य &c. and does not repeat कञ्चुकी. B. कञ्चुकीयः. P. काञ्चुकीयः.

3. B.P.U.जयतु देवः. G. om. जयतु जयतु देवः. U.ins. एषा खलु before च्यवना°. B.P.om. देव. P.कमपि कुमारं.

4. G.K.P. ins. कापि before तापसी. U K. om. संप्राप्ता.

5. B.P.उभौ for उभयम्. K.विज्ञाप्य before उभ° &c.

6. B.महाराजः for देवः.

7. U.तथेति निःक्रम्य तापसीसहितं कुमारमादाय प्रविष्टः. B. om. च. A. पुनः प्रविश्य, and N.N2.B.P. प्रविश्य, for प्रविष्टः.

8. U.om. this speech of Kanchukî. G.P.भवति. A.भगवती. B. om. भगवती. P.परिक्रामति for सर्वे परिक्रामन्ति.

9. P.कुमारं विलोक्य. U. reads the whole speech thus: णं खु एसो वखत्तिअकुमारो जस्स णामङ्किदो गिद्धलक्खवेही णाराओ उवलद्धो तत्थभव-

णामङ्किदो गिध्धलख्खवेधी अध्धणाराओ । तह बहुअरं भवदो अणुकरेदि ।

राजा । स्यादेवम् । अतः खलु

बाष्पायते निपतिता मम दृष्टिरस्मिन्
वात्सल्यबन्धि हृदयं मनसः प्रसादः ।
संजातवेपथुभिरुज्झितधैर्यवृत्ति-
रिच्छामि चैनमदयं परिरब्धुमङ्गैः ॥ ९ ॥

कञ्चु. । भगवति एवं स्थीयताम् ।

तापसीकुमारौ स्थितौ ।

राजा । अम्ब अभिवादये ।

तापसी । [1]महाभाअ सोमवंसविथ्थारइत्तओ होहि । आत्मगतम् । अम्हो

तत्रभवान्क्षत्रियकुमारको यस्य नामाङ्कितो गृध्रलक्षवेधी अर्धनाराचः । तथा बहुतरं भवन्तमनुकरोति ।

१ महाभाग सोमवंशविस्तारयिता भव । अहो अनाख्यातोपि

दो बहु अणुकरेदि. G.एसो णं खु, B.णं खु एसो, K.एसो खु, and P. णं, for किं ण खु सो एसो. N.N2. णु for ण. G.°कुमारो. B.°कु-मालो. P.°उमालो.

1–2. P. inserts एसो before णाम°. N.°लक्खवेही. G.मगाद्ध-णराओ (?), and N.N2.अद्धच-न्दाणणो, for अध्धणाराओ. G.एसो तं विअ भवन्तमणुकरेदि. B.तहावि बहु भवदो अणुकरेदि. K.एसो तहव्विअ भवन्तं अणुकरेदि. P.तह बहु भवदो अणुअरेदि. N.N2.भभवदो.

3. U.एवमेतत् for स्यादेवं and om. अतः खलु. B. om. अतः खलु.

4. G.बाष्पायिना.

5. G.K.वात्सल्यबन्धु for वात्सल्यबन्धि which we read with A.N. N2.B.P.U.

6. A.उज्झत°, and N.N2.उत्कृत°, for उज्झित°.

8. G.K.P.भवति. U. om. भवति altogether.

9. G.K. insert तथा and U. यथोचितं before स्थितौ. P. omits the whole stage-direction.

10. A.N.N2.U.B.भगवति for अम्ब.

11. B.महाराओ. G.°वंसणित्थोरहो. U.°वंसभारभन्तो, and K.°वंसं भारभन्तो, for °वंसविथ्थारइत्तओ. P.U.महाराअ, and B.महाराओ, for महाभाअ. N.N2.होई. U.भो

अणाचक्खिदोवि विण्णादो इमस्स राएसिणो ओरसो संबन्धो ।

प्रकाशम् । जाद पणम दे गुरुं ।

कुमारः । चापगर्भमञ्जलिं करोति ।

राजा । आयुष्मान्भव ।

कुमा. । आत्मगतम् ।

यदि हार्दमिदं श्रुत्वा

पिता ममायं सुतोहमस्येति ।

उत्सङ्गवर्धितानां

गुरुषु भवेत्कीदृशः स्नेहः ॥ १० ॥

राजा । भगवति किमागमनप्रयोजनम् ।

ताप. । सुणादु महाराओ । एसो दीहाऊ आऊ जादमेत्तो एव्व

विज्ञात एतस्य राजर्षेरौरसः संबन्धः । जात प्रणम ते गुरुम् ।

१ शृणोतु महाराजः । एष दीर्घायुरायुर्जातमात्र एवोर्वश्या किमपि

---

for अम्हो. B. om. अम्हो.

1. A.अहो अणाचक्खिदेवि विण्णादो इमस्स राएसिणो आउस्स अ ओरसो संबन्धो. N.N$_2$.अहो अणाचक्खिदेवि विण्णादो इमस्स राअसीणो आउस्स-अओरसो[आउस्स अ ओरसो ? or आउस्स अओरसो ?]संबन्धो. G.K. अहो अणाचक्खिदाविण्णादो इमस्स राएसिणो आउ[G.यु]सो अस्स अ एसो[K.om.] संबन्धो. B.पुरूरवसो आउसो अ before ओरसो. U. भो अणाचक्खिदोवि विण्णादो इमस्स राएसिणो आउसो औरसो संबन्धो. We with P.

2. A.N.N$_2$.पणव for पणम. U.वणव.

3. B.सचाप°. K.उपबद्धमञ्जलिम् for चाप°. U.कृत्वा प्रणमति for करोति.

4. G.K.B. insert कुमार before आयुष्मान्, and N.N$_2$. read आयुष्मन्. U.भूयाः for भव.

5. U.स्पर्शं रूपयित्वा स्वात्मगतम्. P. स्वगतम्.

6. B.हार्दमिमं. So K. but corrected into हार्दमिदं.

8. U.K.उत्सङ्गविवृद्धानां. G.उत्सङ्गादिह वृद्धानाम्.

9. N.N$_2$.कीदृशी प्रीतिः.

10. P.U.B.भवति for भगवति.

11. G.सुणोदु. U. एस. G. दीहाओ आऊ. K.P. om. आऊ. B.P. जादमेत्त एव्व. G.K.जातमेत्तो. N. N$_2$.जातमत्तो. N.N$_2$. om. एव्व. U.उव्वसी[ए?] जादमेत्तो जेव्व for जादमेत्तो एव्व उ°.

उअरसीए किंवि णिमित्तं अवेक्खिअ मम हत्थे णासीकिदो । जं खत्तिअकुमारअस्स जादकम्मादि विहाणं तं से भअवदा चवणेण असेसं अणुचिठ्ठिदं । गिहीदविज्जो धणुव्वेदे अहिविणीदो ।

राजा । सनाथः खलु संवृत्तः ।

ताप. । [1]अज्ज पुफ्फसमिदत्थं इसिकुमारएहिं सह गदेण इमिणा अस्समविरुध्धं आचरिदं ।

निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः । यत्क्षत्रियकुमारस्य जातकर्मादि विधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम् । गृहीतविद्यो धनुर्वेदेभिविनीतः ।

१ अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितम् ।

---

1. G. किं for किंवि. U.K.किंपि. B.P. किं णिमित्तं विअ. G. णिमित्तं. G.K.B. दंसिअ, A. P.अदंसिअ, and N.N₂. अदंसीअ. for अवेक्खिअ. A. ins. महाभाअस्स, N.N₂. महाहाअस्स, and G. K. B. P. महाराअस्स, after अवेक्खिअ. We omit the word with U. and Ranganâtha. B.महा, and P. मह, for मम. G.A. ण्णासीकिदो. B. णिवेसिदो. K.णासीकदो.

2. A.N.N₂ जं च for जं. U.जधा for जं. A.N.N₂. खत्तिअस्स for खत्तिअकुमारअस्स. B.K. °कुमारस्स. U. खत्तिअस्स कुलीणस्स. P. खत्तिअउमाळस्स. A. जादअम्मादि. U.विधाणं. K. om. तं से. U. तत्थभवदा for भअवदा.

3. U.सव्वं for असेसं. K. om. असेसं. G.N₂. °चिट्ठिदं. B.अणुट्ठिदं. P.अणुट्ठिअ. G. गिहीदवेदो. N.N₂. B.गहिदविज्जो. K.गहीद°.G. ins. अ after °विज्जो. U.गाहिदविज्जो धणुव्वेदे अ विणीदो. A.N.N₂. °व्वेदेवि.

4. A.N.N₂.U. विणीदो for अहिविणीदो. K.अहिअं विणीदो. G. अहिविहीदो.

6-7. A. अत्त, and P.अज्जदु, for अज्ज. A.N.N₂. read उण before पुफ्फ° &c. A.N.N₂. °समिअत्थं. U.फुल्लसमिअकुसणिमित्तं for पुफ्फ°. G.B.K.कुमारेहिं. P.°.उमारेहिं. G. सहा. P. णिग्गदेण. A.आसम°. N. N₂.असम°. U.अस्समवास°. A. N.N₂.B.P.आअरिदं. U.समाअरिदं.

विदू. । सावेगम् । [1]किं विअ ।

ताप. । [2]गेहिदामिसो किल गिध्धो पादवसिहरे णिलीअमाणो अणेण लक्खीकिदो बाणस्स ।

विदू. । राजानमवलोकयति ।

राजा । ततस्ततः ।

ताप. । [3]तदो उवलध्धउत्तन्तेण भअवदा चवणेण अहं समादिट्ठा । णिज्जादेहि हथ्थणासंति । ता इच्छामि देविं उव्वसिं पेक्खिदुं ।

राजा । तेन हि आसनमनुगृह्णातु भगवती ।

ताप. । उपनीत आसन उपविशति ।

---

१ किमिव ।—२ गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानोनेन लक्ष्यीकृतो बाणस्य ।—३ तत उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा । निर्यातय हस्तन्यासमिति । तदिच्छामि देवीमुर्वशीं प्रेक्षितुम् ।

---

1. G. K. om. the stage-direction सावेगम्. U.कथं for किं.
2. G.गिहीदामिसो. K.गहीदामिसो. G. K. om. किल. U.गद्धो for गिध्धो. A. N.N₂.B.पाअवसिहरे. U. अस्समपादव°. A.N.N₂.P. ळीअमाणो. B.निळीअ°.
3. B. लक्खिकिदोणेण बाणस्स. A. °कदो. N.N₂.लक्खीकिदोणेण बाणस्स. P.लक्खि°. G.K.लक्खीकिदो से बाणस्स. U.om. अणेण.
4. A.ईक्षते, P.अवेक्षते, and N.N₂. ईक्ष्यते (*sic*), for अवलोकयति.
5. G.P. do not repeat ततः.
6. N.N₂.U K. °वुत्तन्तेण. U.भवदा. P. om. तदो. P.उवलध्ध°. A.N. N₂.संदिट्ठा. G.K. ins. ता after समादिट्ठा.
7. N.N₂. देहि से हत्थण्णासंति for णिज्जादेहि हथ्थणासंति. U.णिज्जादेहि एदं उव्वसीहत्थे णासंति ता उव्वसीं पेक्खिदुं इच्छामि. B.P.णि०आएहि दे हथ्थणासंति. K.णिज्जावेहि एदं उव्वसीहथ्थणासंति. A.G. णिज्जावेहि. G. °ण्णासंति A.देवी उव्वसी. N.N₂. देवीं उव्वसीं. P.B.K.उव्वसी.A.N. N₂.K. देक्खिदुं. P.दक्खिदुं.
8. U. om. तेन हि. K.भवती.
9. A.N.N₂.K.परिजनोपनीते. U.प्रेष्योपनीत आसने समुपवे[वि?]शति. B.तहेत्ति प्रेष्योपनीते आसने उपविशति. P.तहेत्ति आसनमुपविशति.

राजा। लातव्य आहूयतामुर्वशी।

कञ्चु.। यदाज्ञापयति देवः।

[इति निष्क्रान्तः।

राजा। कुमारमवलोक्य। एह्येहि वत्स।

सर्वाङ्गीणः स्पर्शः
सुतस्य किल तेन मामुपगतेन।
आह्लादयस्व ताव-
च्चन्द्रकरश्चन्द्रकान्तमिव ॥ ११ ॥

ताप.। जाद[1] आणन्देहि पिदरं।

कुमा.। राजानमुपगम्य। पादग्रहणं करोति।

राजा। कुमारं परिष्वज्य पादपीठे चोपवेश्य। वत्स इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व।

विदू.। [2]किंति सङ्किस्सादि। अस्समवासपरिचिदो एव्व साहामिओ।

---

१ जात आनन्दय पितरम्।—२ किमिति शङ्किष्यते। आश्रमवासपरिचित एव शाखामृगः।

---

1 U.आर्य लातव्य उच्यतामुर्वशी. P. आह्वीयताम् (*sic*).

3. U.तथेति निःक्रान्तः.

4. U. om. stage-direction कुमारम् &c. A.N.N2.वत्स एह्येहि.

6. N.N2.सुतस्य ते किल समामुपगतेन. U.K.उपनतेन. P.सुखेन for सुतस्य.

7. A.N.N2.U. प्रह्लादयस्व.

9. G.K.omit जाद. N.N2. read अणुणेहि, and U.णन्देहि, for आणन्देहि.

10. For उपगम्य G.P. have उपेत्य. U.उपसर्पति for उपगम्य and om. पादग्र° क°. K.करोमि, changing the stage-direction into a speech.

11. G.K.उपवेशयति for उपवेश्य.A. N.N2. om.च. U. has simply आलिङ्ग्य for the whole stage-direction.—K.G.B.omit वत्स. N.N2. तावत् for तव. G.पितृसखं, B.सखायम्, and P. सहायम्, for प्रियसखम्. U.वत्स प्रियसखं मे for वत्स इतस्तव पितुः प्रियसखम्.

13. N.N2.किं for किंति. A.सङ्किस्सिदि. K.संदिहिस्सादि. G.K.U. ins. णं before अस्सम° &c. A. सास्सम° for अस्सम°.N.N2. आसमवा-

कुमा. । सस्मितम् । तात वन्दे ।

विदू. । सोत्थि भवदो ।

ततः प्रविशत्युर्वशी कञ्चुकी च ।

कञ्चु. । इत इतो देवी ।

उर्व. । कुमारमवलोक्य । को णु खु एसो सबाणासणो पादपीठे सअं महाराएण संअमिअमाणसिहण्डओ चिट्ठदि । तापसीं दृष्ट्वा । अम्मो सच्चवदीसूचिदो मे पुत्तओ आऊ । महन्तो खु संवुत्तो । परिक्रामति ।

---

१ स्वस्ति भवते ।—२ को नु खल्वेष सबाणासनः पादपीठे स्वयं महाराजेन संयम्यमानशिखण्डकस्तिष्ठति । अहो सत्यवतीसूचितो मम पुत्रक आयुः । महान्खलु संवृत्तः ।

सपरिचओभदो एव्व से सद्धा[हा?]-महो. U.णं अस्समवासपरिचिदो अहं एदस्स सहाओ. A.B.°परिइदो. K. °परिचिद. A.एस्से for एव्व. G. K. सहामिओ. B. सेसभावो, and P.से सहावो for एव्व साहामिओ.

1. B.P.वन्दामि for वन्दे.
2. A.दे for भवदो. N.N2.B.P.सोत्थि होदे. U.सत्थि भवदे वड्ढदु भवं. K. सोत्थिभोदो.
3. G.कञ्चुकीपूर्वा उर्वशी. B.उर्वशी काञ्चुकीयश्च. K. कञ्चुकी उर्वशी च.
4. G.K.om.देवी. U.भवती for देवी. P. इदो इदो देवी.

5-6. N.N2.विलोक्य. U.परिक्रम्यावलोक्य च. B.om. कुमारं and has विलोक्य. B.N.N2.give the speech thus: को णु खु एसो सबाणासणो पाअवीटे[B.°पीठे] ओविसिअ [B.उववेसिदो] सअं महाराएण सयमीमाणं (*sic*) सिहो[B.सभज्जमाणसिहण्डो] जाअतुओ[B.om.] चिट्ठदि. U.कणअपीठोववि‌ट्ठो. K.कणअपादपीठे omitting उपविट्ठो. P.को एसो सबाणासणो पादपीठे उवेसिदो सअं महाराएण संअमिअमाणसिहो दिस्सइ. G. को णु खु एसो बाणासणहत्थो कणअपादपीठोपविट्ठो सअं महाराएण सज्जीकिअमाणसिहण्डओ चिट्ठदि. A.संजमीअमाणसिहण्डओ. U.K.सज्जीअमाणसिहण्डो चिट्ठदि. U.om. सअं. A. inserts after °पीठे the word उविसिअ. U.om. सबाणासणो. A.पाअवीटे. U.om. °पाद°. A.B.P.अम्हो. U.अम्हहे.

7. A.सच्चवदीए समप्पिदो, and P. सच्चवई॥सूइदो[for सच्चवईसूइदो ?], for सच्चवदीसूचिदो. N.N2.सच्चवादीए(*sic*) सूइदो. U.सच्चवदीसहिदो पुत्तको मे आऊ. B.सच्चवदीसुइदो मे पुत्तो आऊ &c. A.om.आऊ. N. N2.मे पुत्तओसोओ(?). G.आओ for आऊ. P.वुत्तओ. B.K.G.in-

राजा । उर्वशीं दृष्ट्वा ।

इयं ते जननी प्राप्ता त्वदालोकनतत्परा ।
स्नेहप्रस्नवनिर्भिन्नमुद्वहन्ती स्तनांशुकम् ॥ १२ ॥

ताप. । [१]जाद एहि पच्चुगच्छ मादरं ।

कुमा. । उर्वशीं प्रत्युद्गच्छति ।

उर्व. । [२]अम्ब पादपणामं करोमि ।

ताप. । [३]वच्छे भत्तुणो बहुमदा होहि ।

कुमा. । अम्ब अभिवादये ।

उर्व. । कुमारमुन्नमितमुखं परिष्वज्य । [४]वच्छ पिदरं आराधइत्तओ होहि ।
राजानमुपेत्य । जेदु जेदु महाराओ ।

१ जात एहि प्रत्युद्गच्छ मातरम् ।—२ अम्ब पादप्रणामं करोमि ।—३ वत्से भर्तुर्बहुमता भव ।—४ वत्स पितरमाराधयिता भव । जयतु जयतु महाराजः ।

sert सहर्षम् before परिक्रामति. U.om.परिक्रामति.

1. U.B.विलोक्य for उर्वशीं दृष्ट्वा. K.अवलोक्य for दृष्ट्वा.

2. A.N.N2.U.वत्स before इयं &c.

3. B.P. °प्रस्नवनिर्भिण्णम्. N.N2. °प्रस्नवसंभिन्नमुद्वहन्ती स्तनद्वयम्. U. °प्रसर° for °प्रस्नव°.

4. A.जात. N.N2.om.एहि. P.वच्छ, and B वच्च, for जाद एहि. N.N2. पच्चुग्गच्छ माअरं. U.पच्चुवगच्छ. K.उग्गच्छ.

5. N.N2.प्रत्युत्तिष्ठति, and U.उपसर्पति, for प्रत्युद्गच्छति.

6. G.K.N.N2. insert तापसीं प्रति before अम्ब. A.अय्ये, and N.N2. U.अज्ज, for अम्ब. K.A.U.P. °वन्दणं for °पणामं. B.°प्पणामं, and ins. वो bef. करेमि. P. अ०ए वो पादवन्दणं करोमि.

7. A.N.N2.वत्से. U.वच्छे. B.वच्चे. G.K.om.वच्छे. N.N2.होई.

8. N.N2. repeat अम्ब twice. U.त्वामभिवन्दये for अभिवादये.

9. G.उन्नमिताननं कृत्वा. U.उन्नताननं कृत्वा. K.om.कुमारम्, and reads मुखमुन्नमितं कृत्वा. N.N2.om.वच्छ. U.वत्थ. B.वच्च. G.K.वत्स. G. आराधअन्तो. N.N2. आराधइत्तणो. U.K.आराधअन्तो. B.पितुणो आराहइत्तओ. P.पिदुणो आराधइत्तओ.

10. N.N2.होइ. U.प्रति for उपेत्य.

राजा । स्वागतं पुत्रवत्यै । इत आस्यताम् । अर्धासनं ददाति ।

उर्व. । उपविशति ।

सर्वे यथोचितमुपविशन्ति ।

ताप. । एसो गिहीदविज्जो आऊ संपदं कवअहरो संवुत्तो । ता एदस्स दे भत्तुणो समक्खं णिज्जादिदो हत्थणिक्खेवो । ता विसज्जेदुं इच्छामि । उवरुज्झइ मे अस्समधम्मो ।

१ एष गृहीतविद्य आयुः सांप्रतं कवचधरः संवृत्तः । तदेतस्य ते भर्तुः समक्षं निर्यातितो हस्तनिक्षेपः । तद्विसर्जयितुमिच्छामि । उपरुध्यते ममाश्रमधर्मः ।

B.P.जेदु unrepeated. G.जअदु जअदु. U.जयदु जयदु.

1. N.N2.B.P.इति before अर्धासनम्. U.om. the stage-direction अर्धासनं ददाति.

2. For उपविशति, B. has उ०। अय्ये उपविसदु होदी, K.has उ०। सव्वे उवविसन्दु, and P. has उ०। अ०ओ उवविसदु. U.अज्जा उवविसअ, and A.अय्य उवसीअदु, for उपविशति. N.N2.अज्जे इदो उवसीअदु, and assign the speech to Vidûshaka.

3. Before सर्वे यथोचितमुपविशन्ति, G. ins. राजा । सर्वे यथोचितमुपविशन्तु. B.P.A. N. N2. °स्थानं for °उचितम्. U.तथेति for यथोचितम्.

